संस्कृत बनाओ :—(क) (कथ्, भक्ष् धातु) १. **उन दोनों की संपत्ति का क्या कहना ?** २. उन्होंने **जनक से कहा** कि राम धनुष को देखना चाहते हैं। ३. कथा के **बहाने से** यहाँ नीति ही कही गई है। ४. दूसरे का उच्छिष्ट न खावे। ५. गुरु आज्ञा देते हैं (आज्ञापि) कि पापों को **छोड़ो**। ६. स्त्री अलंकारों से अपने शरीर को **विभूषित करती है** (भूष्)। ७. बालक मिठाई का **स्वाद लेता है** (आस्वद्)। ८. वह बर्तनों को **माँजता है** (मृज्), शत्रुओं को **तपाता है** (तप्), सज्जनों को **तृप्त करता है** (तृप्), मान्यों का **मान करता है** (मान्) और दुष्टों को **दबाता है** (धृष्)। **(ख)** (तद्धित प्रत्यय) १. शारीरिक पुष्टि के लिए पंचगव्य का सेवन करना चाहिए। २. **जुआरी पासों से** जुआ खेलता है (दिव्)। ३. सभ्य अपने-अपने स्थानों को **लौट गए**। ४. अहिंसा का सिद्धान्त **अपनी भलाई और विश्व की भलाई दोनों के लिए है**। ५. राम **लगभग अठारह वर्ष का है**। ६. अब **लगभग दोपहर का** समय है। ७. वह **लगभग मरा हुआ है**। ८. आग सब वस्तुओं को भस्मसात् कर देती है। ९. नेहरूजी का कथन था कि श्रमिकों की **गन्दी बस्तियों को जला दो** और उनके लिए साफ मकान बनाओ। १०. **एकचित्त होकर** देशोद्धार में लगो (प्रवृत्)। ११. **कुल मिलाकर** मुझे बीस रुपए दो। १२. यह **बात** मुझको ही **संकेत करती है**। १३. मकान **जलकर राख हो गए**। १४. यह **बात सर्वत्र फैल गई है**। **(ग)** (रोगवर्ग) १. **मुझे बड़ा सिरदर्द है**। २. **यह फोड़े पर फोड़ा निकला है**। ३. उसके **रोग का शीघ्र इलाज करो**। ४. आज **मेरी तबीयत पहले से ठीक है**। ५. **रोग को ठीक जाने बिना उसका इलाज नहीं करना चाहिए**। ६. इसका रोग **बहुत बढ़ गया है**। ७. **रोगी की जान खतरे में है**। ८. उसका रोग असाध्य है। **(घ)** (रोगवर्ग) शरीर व्याधियों का घर है। अतः कहा गया है कि धर्म, अर्थ, काम और मोक्ष का सर्वोत्तम मूल आरोग्य है। अतः सदा स्वस्थ रहने का प्रयत्न करना चाहिए। सात्त्विक भोजन, उचित आहार-विहार, दैनिक व्यायाम, भ्रमण, योगासन और प्राणायाम से शरीर नीरोग रहता है। इन नियमों पर ध्यान न देने से ही खाँसी, जुकाम, बुखार, मलेरिया, इन्फ्लुएन्जा, निमोनिया, टाइफाइड, तपेदिक, चेचक, मोतीझरा, दस्त, पेचिश, संग्रहणी, हैजा, फोड़ा, फुंसी, बवासीर, प्रमेह, मधुमेह, कब्ज आदि रोग होते हैं। केन्सर, लकवा मारना, तपेदिक और दिल के रोग, ये घातक रोग हैं। विशेषज्ञों का कथन है कि रोगों का कारण जीवन की अनियमितता है। जीवन को नियमित बनावें और वेद के शब्दों में नीरोग होकर **सौ वर्ष जीवें। सब सुखी हों, सब नीरोग हों, सब सुख देखें और कोई दुःखी न हो।**

संकेत :—(क) १. किं कथ्यते श्रीरुभयस्य तस्य। २. मैथिलाय कथयांबभूव। ३. छलेन। ५. वर्जय। ६. भूषयति। ७. आस्वादयति। ८. मार्जयति, तापयति, तर्पयति, मानयति, धर्षयति। **(ख)** २. आक्षिकः, अक्षैः। ३. प्रतिजग्मुः। ४. आत्मनीनो विश्वजनीनश्च वर्तते। ५. अष्टादशवर्षदेशीयः। ६. मध्याह्नकल्पः। ७. मृतप्रायः। ९. शीर्णान्यावासस्थानानि अग्निसात् कुरुत। १०. एकचित्तीभूय। ११. पिण्डीकृत्य। १२. कथा, लक्ष्यीकरोति। १३. भस्मीभूतानि। १४. वृत्तं बहुलीभूतम्। **(ग)** १. बलवती शिरोवेदना मां बाधते। २. गण्डस्योपरि पिटिका संवृत्ता। ३. विकारो विलम्बाक्षमः। ४. अस्ति मे विशेषोऽद्य। ५. विकारं खलु परमार्थतोऽज्ञात्वाऽनारम्भः प्रतीकारस्य। ६. अतिभूमिं गतः। ७. आतुरो जीवितसंशये वर्तते। **(घ)** हृद्रोगाः। जीवेम शरदः शतम्। सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत्।

व्याकरण

आवश्यक निर्देश

१. शब्दरूप-संग्रह में उन सभी शब्दों (१०० शब्दों) का संग्रह किया गया है, जो अधिक प्रचलित हैं। जिन शब्दों का प्रयोग बहुत कम होता है या सर्वथा नहीं होता है, उनका समावेश इसमें नहीं किया गया है।

२. शब्दों और धातुओं के रूप के साथ अभ्यासों की संख्याएँ दी गई हैं। उसका भाव यह है कि उस शब्द या धातु का प्रयोग उस अभ्यास में हुआ है और उस प्रकार से चलनेवाले शब्द या धातु भी उस अभ्यास में दिए गए हैं। अनुवादवाले प्रकरण में उस शब्द या धातु के अभ्यास में उसी प्रकार चलनेवाले शब्द या धातु यथास्थान कोष्ठ में दिए गए हैं, उनके रूप भी निर्दिष्ट शब्द या धातु के तुल्य चलावें।

३. संक्षेप के लिए निम्नलिखित संकेतों का उपयोग किया गया है :—

(क) शब्दरूपों में प्रथमा आदि के लिए उनके प्रथम अक्षर रखे गए हैं। जैसे-प्र०=प्रथमा, द्वि०=द्वितीया, तृ०=तृतीया, च०=चतुर्थी, पं०=पंचमी, ष०=षष्ठी, स०=सप्तमी, सं०=संबोधन।

(ख) पुं०=पुंलिंग, स्त्री०=स्त्रीलिंग, नपुं०=नपुंसक लिंग। एक०=एकवचन, द्वि०=द्विवचन, बहु०=बहुवचन। दे०अ०=देखो अभ्यास, अ०=अभ्यास। प्रत्येक शब्द या धातु के रूप में ऊपर से नीचे की ओर प्रथम पंक्ति एकवचन की है, दूसरी द्विवचन की और तीसरी बहुवचन की। जो शब्द किसी विशेष वचन में ही चलते हैं, उनके उसी वचन के रूप हैं।

(ग) धातुरूपों में प्र०पु० या प्र०=प्रथम पुरुष (अन्य पुरुष), म०पु० या म०=मध्यम पुरुष, उ०पु० या उ०=उत्तम पुरुष। पर० या प०=परस्मैपद, आत्मने० या आ०=आत्मनेपद, उभय० या उ०=उभयपद।

४. सर्वनाम शब्दों का संबोधन नहीं होता, अत: उनके रूप संबोधन में नहीं दिए गए हैं।

५. शब्दरूपों के लिए ये नियम स्मरण कर लें—(१) (अट्कुप्वाङ्नुम्व्यवायेऽपि) र् और ष् के बाद न् को ण् होता है, यदि अट् (स्वर, ह, य, व, र), कवर्ग, पवर्ग, आ, न् बीच में हों तो भी न् को ण् होगा। ऋ वाले शब्दों में भी यह नियम लगेगा। अत: र्, ऋ और ष् वाले शब्दों में इस नियम के अनुसार न् को ण् करें, अन्यत्र न् ही रहेगा। (२) (इण्को:, आदेशप्रत्यययो:) अ को छोड़कर अन्य स्वरों के बाद तथा कवर्ग के बाद प्रत्यय के स् को ष् हो जाता है। धातुओं में भी यह नियम लगेगा। जैसे-रामेषु, हरिषु, कर्तृषु, वाक्षु।

(१) शब्दरूप-संग्रह

(क) अजन्त पुंलिंग शब्द

(१) राम (राम) (देखो अभ्यास १)

रामः	रामौ	रामाः	प्र०
रामम्	,,	रामान्	द्वि०
रामेण	रामाभ्याम्	रामैः	तृ०
रामाय	,,	रामेभ्यः	च०
रामात्	,,	,,	पं०
रामस्य	रामयोः	रामाणाम्	ष०
रामे	,,	रामेषु	स०
हे राम	हे रामौ	हे रामाः	सं०

(२) पाद (पैर) (देखो अभ्यास ५७)

प्र०	पादः	पादौ	पादाः
द्वि०	पादम्	,,	पदः
तृ०	पदा	पद्भ्याम्	पद्भिः
च०	पदे	,,	पद्भ्यः
पं०	पदः	,,	,,
ष०	पदः	पदोः	पदाम्
स०	पदि	,,	पत्सु
सं०	हे पाद	हे पादौ	हे पादाः

सूचना— पाद के पूरे रूप राम के तुल्य भी चलेंगे। पाद के तुल्य ही दन्त (दत्) के द्वितीया बहु० आदि में दतः, दता, दद्भ्याम् आदि रूप होंगे।

❖ ❖ ❖

(३) गोपा (ग्वाला) (दे० अ० ५८)

गोपाः	गोपौ	गोपाः	प्र०
गोपाम्	,,	गोपः	द्वि०
गोपा	गोपाभ्याम्	गोपाभिः	तृ०
गोपे	,,	गोपाभ्यः	च०
गोपः	,,	,,	पं०
,,	गोपोः	गोपाम्	ष०
गोपि	,,	गोपासु	स०
हे गोपाः	हे गोपौ	हे गोपाः	सं०

(४) हरि (विष्णु) (देखो अ० ४)

प्र०	हरिः	हरी	हरयः
द्वि०	हरिम्	,,	हरीन्
तृ०	हरिणा	हरिभ्याम्	हरिभिः
च०	हरये	,,	हरिभ्यः
पं०	हरेः	,,	,,
ष०	,,	हर्योः	हरीणाम्
स०	हरौ	,,	हरिषु
सं०	हे हरे	हे हरी	हे हरयः

❖ ❖ ❖

(५) सखि (मित्र) (दे० अ० १९)

सखा	सखायौ	सखायः	प्र०
सखायम्	,,	सखीन्	द्वि०
सख्या	सखिभ्याम्	सखिभिः	तृ०
सख्ये	,,	सखिभ्यः	च०
सख्युः	,,	,,	पं०
,,	सख्योः	सखीनाम्	ष०
सख्यौ	,,	सखिषु	स०
हे सखे	हे सखायौ	हे सखायः	सं०

(६) पति (पति) (दे० अ० २०)

प्र०	पतिः	पती	पतयः
द्वि०	पतिम्	,,	पतीन्
तृ०	पत्या	पतिभ्याम्	पतिभिः
च०	पत्ये	,,	पतिभ्यः
पं०	पत्युः	,,	,,
ष०	,,	पत्योः	पतीनाम्
स०	पत्यौ	,,	पतिषु
सं०	हे पते	हे पती	हे पतयः

सूचना—स्त्रीलिंग में सखी के रूप नदीवत् चलेंगे।

(७) भूपति (राजा) (हरिवत्) (दे० अ० ४) **(८) सुधी (विद्वान्)** (दे० अ०२१)

भूपतिः	भूपती	भूपतयः	प्र०	सुधीः	सुधियौ	सुधियः
भूपतिम्	''	भूपतीन्	द्वि०	सुधियम्	''	''
भूपतिना	भूपतिभ्याम्	भूपतिभिः	तृ०	सुधिया	सुधीभ्याम्	सुधीभिः
भूपतये	''	भूपतिभ्यः	च०	सुधिये	''	सुधीभ्यः
भूपतेः	''	''	पं०	सुधियः	''	''
''	भूपत्योः	भूपतीनाम्	ष०	''	सुधियोः	सुधियाम्
भूपतौ	''	भूपतिषु	स०	सुधियि	''	सुधीषु
हे भूपते	हे भूपती	हे भूपतयः	सं०	हे सुधीः	हे सुधियौ	हे सुधियः

❖ ❖ ❖

(९) गुरु (गुरु) (दे० अ० ५) **(१०) स्वभू (ब्रह्मा)** (दे० अ० २१)

गुरुः	गुरू	गुरवः	प्र०	स्वभूः	स्वभुवौ	स्वभुवः
गुरुम्	''	गुरून्	द्वि०	स्वभुवम्	''	''
गुरुणा	गुरुभ्याम्	गुरुभिः	तृ०	स्वभुवा	स्वभूभ्याम्	स्वभूभिः
गुरवे	''	गुरुभ्यः	च०	स्वभुवे	''	स्वभूभ्यः
गुरोः	''	''	पं०	स्वभुवः	''	''
''	गुर्वोः	गुरूणाम्	ष०	''	स्वभुवोः	स्वभुवाम्
गुरौ	''	गुरुषु	स०	स्वभुवि	''	स्वभूषु
हे गुरो	हे गुरू	हे गुरवः	सं०	हे स्वभूः	हे स्वभुवौ	हे स्वभुवः

❖ ❖ ❖

(११) कर्तृ (करनेवाला) (दे० अ० २२) **(१२) पितृ (पिता)** (दे० अ० २३)

कर्ता	कर्तारौ	कर्तारः	प्र०	पिता	पितरौ	पितरः
कर्तारम्	''	कर्तॄन्	द्वि०	पितरम्	''	पितॄन्
कर्त्रा	कर्तृभ्याम्	कर्तृभिः	तृ०	पित्रा	पितृभ्याम्	पितृभिः
कर्त्रे	''	कर्तृभ्यः	च०	पित्रे	''	पितृभ्यः
कर्तुः	''	''	पं०	पितुः	''	''
''	कर्त्रोः	कर्तॄणाम्	ष०	''	पित्रोः	पितॄणाम्
कर्तरि	''	कर्तृषु	स०	पितरि	''	पितृषु
हे कर्तः	हे कर्तारौ	हे कर्तारः	सं०	हे पितः	हे पितरौ	हे पितरः

(१३) नृ (मनुष्य) (पितृवत्) (दे० अ० २३) **(१४) गो (बैल या गाय) पुं०, स्त्री०** (दे० अ० २४)

ना	नरौ	नरः	प्र०	गौः	गावौ	गावः
नरम्	''	नॄन्	द्वि०	गाम्	''	गाः
न्रा	नृभ्याम्	नृभिः	तृ०	गवा	गोभ्याम्	गोभिः
न्रे	''	नृभ्यः	च०	गवे	''	गोभ्यः
नुः	''	''	पं०	गोः	''	''
''	न्रोः	नृणाम्, नॄणाम्	ष०	''	गवोः	गवाम्
नरि	''	नृषु	स०	गवि	''	गोषु
हे नः	हे नरौ	हे नरः	सं०	हे गौः	हे गावौ	हे गावः

❖ ❖ ❖

(ख) हलन्त पुंलिंग शब्द

(१५) पयोमुच् (बादल) (दे० अ० २६) **(१६) प्राञ्च् (पूर्वी)** (दे० अ० २५)

पयोमुक्	पयोमुचौ	पयोमुचः	प्र०	प्राङ्	प्राञ्चौ	प्राञ्चः
पयोमुचम्	''	''	द्वि०	प्राञ्चम्	''	प्राचः
पयोमुचा	पयोमुग्भ्याम्	पयोमुग्भिः	तृ०	प्राचा	प्राग्भ्याम्	प्राग्भिः
पयोमुचे	''	पयोमुग्भ्यः	च०	प्राचे	''	प्राग्भ्यः
पयोमुचः	''	''	पं०	प्राचः	''	''
''	पयोमुचोः	पयोमुचाम्	ष०	''	प्राचोः	प्राचाम्
पयोमुचि	''	पयोमुक्षु	स०	प्राचि	''	प्राक्षु
हे पयोमुक्	हे पयोमुचौ	हे पयोमुचः	सं०	हे प्राङ्	हे प्राञ्चौ	हे प्राञ्चः

❖ ❖ ❖

(१७) उदञ्च् (उत्तरी) (दे० अ० २५) **(१८) वणिज् (बनिया)** (दे० अ० २६)

उदङ्	उदञ्चौ	उदञ्चः	प्र०	वणिक्	वणिजौ	वणिजः
उदञ्चम्	''	उदीचः	द्वि०	वणिजम्	''	''
उदीचा	उदग्भ्याम्	उदग्भिः	तृ०	वणिजा	वणिग्भ्याम्	वणिग्भिः
उदीचे	''	उदग्भ्यः	च०	वणिजे	''	वणिग्भ्यः
उदीचः	''	''	पं०	वणिजः	''	''
''	उदीचोः	उदीचाम्	ष०	''	वणिजोः	वणिजाम्
उदीचि	''	उदक्षु	स०	वणिजि	''	वणिक्षु
हे उदङ्	हे उदञ्चौ	हे उदञ्चः	सं०	हे वणिक्	हे वणिजौ	हे वणिजः

(१९) भूभृत् (राजा, पर्वत) (दे० अ० २७) — **(२०) भगवत् (भगवान्)** (दे० अ० २८)

भूभृत्	भूभृतौ	भूभृतः	प्र०	भगवान्	भगवन्तौ	भगवन्तः
भूभृतम्	,,	,,	द्वि०	भगवन्तम्	,,	भगवतः
भूभृता	भूभृद्भ्याम्	भूभृद्भिः	तृ०	भगवता	भगवद्भ्याम्	भगवद्भिः
भूभृते	,,	भूभृद्भ्यः	च०	भगवते	,,	भगवद्भ्यः
भूभृतः	,,	,,	पं०	भगवतः	,,	,,
,,	भूभृतोः	भूभृताम्	ष०	,,	भगवतोः	भगवताम्
भूभृति	,,	भूभृत्सु	स०	भगवति	,,	भगवत्सु
हे भूभृत्	हे भूभृतौ	हे भूभृतः	सं०	हे भगवन्	हे भगवन्तौ	हे भगवन्तः

❖ ❖ ❖

(२१) धीमत् (बुद्धिमान्) (दे० अ० २८) **(२२) महत् (महान्)** (दे० अ० २९)

धीमान्	धीमन्तौ	धीमन्तः	प्र०	महान्	महान्तौ	महान्तः
धीमन्तम्	,,	धीमतः	द्वि०	महान्तम्	,,	महतः
धीमता	धीमद्भ्याम्	धीमद्भिः	तृ०	महता	महद्भ्याम्	महद्भिः
धीमते	,,	धीमद्भ्यः	च०	महते	,,	महद्भ्यः
धीमतः	,,	,,	पं०	महतः	,,	,,
,,	धीमतोः	धीमताम्	ष०	,,	महतोः	महताम्
धीमति	,,	धीमत्सु	स०	महति	,,	महत्सु
हे धीमन्	हे धीमन्तौ	हे धीमन्तः	सं०	हे महन्	हे महान्तौ	हे महान्तः

❖ ❖ ❖

(२३) भवत् (आप) (दे० अ० २९) **(२४) पठत् (पढ़ता हुआ)** (दे० अ० ३०)

भवान्	भवन्तौ	भवन्तः	प्र०	पठन्	पठन्तौ	पठन्तः
भवन्तम्	,,	भवतः	द्वि०	पठन्तम्	,,	पठतः
भवता	भवद्भ्याम्	भवद्भिः	तृ०	पठता	पठद्भ्याम्	पठद्भिः
भवते	,,	भवद्भ्यः	च०	पठते	,,	पठद्भ्यः
भवतः	,,	,,	पं०	पठतः	,,	,,
,,	भवतोः	भवताम्	ष०	,,	पठतोः	पठताम्
भवति	,,	भवत्सु	स०	पठति	,,	पठत्सु
हे भवन्	हे भवन्तौ	हे भवन्तः	सं०	हे पठन्	हे पठन्तौ	हे पठन्तः

सूचना- स्त्रीलिंग में भवती के रूप नदी (शब्द० ४३) के तुल्य चलेंगे।

(२५) **यावत् (जितना)** (दे० अ० ३०)				(२६) **बुध् (विद्वान्)** (दे० अ० ३१)		
यावान्	यावन्तौ	यावन्तः	प्र०	भुत्	बुधौ	बुधः
यावन्तम्	''	यावतः	द्वि०	बुधम्	''	''
यावता	यावद्भ्याम्	यावद्भिः	तृ०	बुधा	भुद्भ्याम्	भुद्भिः
यावते	''	यावद्भ्यः	च०	बुधे	''	भुद्भ्यः
यावतः	''	''	पं०	बुधः	''	''
''	यावतोः	यावताम्	ष०	''	बुधोः	बुधाम्
यावति	''	यावत्सु	स०	बुधि	''	भुत्सु
हे यावत्	हे यावन्तौ	हे यावन्तः	सं०	हे भुत्	हे बुधौ	हे बुधः

❖ ❖ ❖

(२७) **आत्मन् (आत्मा)** (दे० अ० ३२)				(२८) **राजन् (राजा)** (दे० अ० ३२)		
आत्मा	आत्मानौ	आत्मानः	प्र०	राजा	राजानौ	राजानः
आत्मानम्	''	आत्मनः	द्वि०	राजानम्	''	राज्ञः
आत्मना	आत्मभ्याम्	आत्मभिः	तृ०	राज्ञा	राजभ्याम्	राजभिः
आत्मने	''	आत्मभ्यः	च०	राज्ञे	''	राजभ्यः
आत्मनः	''	''	पं०	राज्ञः	''	''
''	आत्मनोः	आत्मनाम्	ष०	''	राज्ञोः	राज्ञाम्
आत्मनि	''	आत्मसु	स०	राज्ञि, राजनि	''	राजसु
हे आत्मन्	हे आत्मानौ	हे आत्मानः	सं०	हे राजन्	हे राजानौ	हे राजानः

❖ ❖ ❖

(२९) **श्वन् (कुत्ता)** (दे० अ० ३३)				(३०) **युवन् (युवक)** (दे० अ० ३३)		
श्वा	श्वानौ	श्वानः	प्र०	युवा	युवानौ	युवानः
श्वानम्	''	शुनः	द्वि०	युवानम्	''	यूनः
शुना	श्वभ्याम्	श्वभिः	तृ०	यूना	युवभ्याम्	युवभिः
शुने	''	श्वभ्यः	च०	यूने	''	युवभ्यः
शुनः	''	''	पं०	यूनः	''	''
''	शुनोः	शुनाम्	ष०	''	यूनोः	यूनाम्
शुनि	''	श्वसु	स०	यूनि	''	युवसु
हे श्वन्	हे श्वानौ	हे श्वानः	सं०	हे युवन्	हे युवानौ	हे युवानः

(३१) वृत्रहन् (इन्द्र) (दे० अ० ३४) **(३२) मघवन् (इन्द्र)** (दे० अ० ३४)

वृत्रहा	वृत्रहणौ	वृत्रहण:	प्र०	मघवा	मघवानौ	मघवान:
वृत्रहणम्	''	वृत्रघ्न:	द्वि०	मघवानम्	''	मघोन:
वृत्रघ्ना	वृत्रहभ्याम्	वृत्रहभि:	तृ०	मघोना	मघवभ्याम्	मघवभि:
वृत्रघ्ने	''	वृत्रहभ्य:	च०	मघोने	''	मघवभ्य:
वृत्रघ्न:	''	''	पं०	मघोन:	''	''
''	वृत्रघ्नो:	वृत्रघ्नाम्	ष०	''	मघोनो:	मघोनाम्
वृत्रघ्नि, वृत्रहणि	''	वृत्रहसु	स०	मघोनि	''	मघवसु
हे वृत्रहन्	हे वृत्रहणौ	हे वृत्रहण:	सं०	हे मघवन्	हे मघवानौ	हे मघवान:

सूचना- मघवन् का ही मघवत् शब्द बनाकर भगवत् (शब्द० २०) के तुल्य भी रूप चलावें।

❖ ❖ ❖

(३३) करिन् (हाथी) (दे० अ० ३५) **(३४) पथिन् (मार्ग)** (दे० अ० ३५)

करी	करिणौ	करिण:	प्र०	पन्था:	पन्थानौ	पन्थान:
करिणम्	''	''	द्वि०	पन्थानम्	''	पथ:
करिणा	करिभ्याम्	करिभि:	तृ०	पथा	पथिभ्याम्	पथिभि:
करिणे	''	करिभ्य:	च०	पथे	''	पथिभ्य:
करिण:	''	''	पं०	पथ:	''	''
''	करिणो:	करिणाम्	ष०	''	पथो:	पथाम्
करिणि	''	करिषु	स०	पथि	''	पथिषु
हे करिन्	हे करिणौ	हे करिण:	सं०	हे पन्था:	हे पन्थानौ	हे पन्थान:

❖ ❖ ❖

(३५) तादृश् (वैसा) (दे० अ० ३६) **(३६) विद्वस् (विद्वान्)** (दे० अ० ३७)

तादृक्	तादृशौ	तादृश:	प्र०	विद्वान्	विद्वांसौ	विद्वांस:
तादृशम्	''	''	द्वि०	विद्वांसम्	''	विदुष:
तादृशा	तादृग्भ्याम्	तादृग्भि:	तृ०	विदुषा	विद्वद्भ्याम्	विद्वद्भि:
तादृशे	''	तादृग्भ्य:	च०	विदुषे	''	विद्वद्भ्य:
तादृश:	''	''	पं०	विदुष:	''	''
''	तादृशो:	तादृशाम्	ष०	''	विदुषो:	विदुषाम्
तादृशि	''	तादृक्षु	स०	विदुषि	''	विद्वत्सु
हे तादृक्	हे तादृशौ	हे तादृश:	सं०	हे विद्वन्	हे विद्वांसौ	हे विद्वांस:

(३७) पुंस् (पुरुष) (दे० अ० ३७) **(३८) चन्द्रमस् (चन्द्रमा)** (दे० अ० ३६)

पुंस्				चन्द्रमस्		
पुमान्	पुमांसौ	पुमांसः	*प्र०*	चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
पुमांसम्	''	पुंसः	*द्वि०*	चन्द्रमसम्	''	''
पुंसा	पुंभ्याम्	पुंभिः	*तृ०*	चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
पुंसे	''	पुंभ्यः	*च०*	चन्द्रमसे	''	चन्द्रमोभ्यः
पुंसः	''	''	*पं०*	चन्द्रमसः	''	''
''	पुंसोः	पुंसाम्	*ष०*	''	चन्द्रमसोः	चन्द्रमसाम्
पुंसि	''	पुंसु	*स०*	चन्द्रमसि	''	चन्द्रमस्सु
हे पुमन्	हे पुमांसौ	हे पुमांसः	*सं०*	हे चन्द्रमः	हे चन्द्रमसौ	हे चन्द्रमसः

❖ ❖ ❖

(३९) श्रेयस् (अधिक प्रशंसनीय) (दे० अ० ३८) **(४०) अनडुह् (बैल)** (दे० अ० ३८)

श्रेयस्				अनडुह्		
श्रेयान्	श्रेयांसौ	श्रेयांसः	*प्र०*	अनड्वान्	अनड्वाहौ	अनड्वाहः
श्रेयांसम्	''	श्रेयसः	*द्वि०*	अनड्वाहम्	''	अनडुहः
श्रेयसा	श्रेयोभ्याम्	श्रेयोभिः	*तृ०*	अनडुहा	अनडुद्भ्याम्	अनडुद्भिः
श्रेयसे	''	श्रेयोभ्यः	*च०*	अनडुहे	''	अनडुद्भ्यः
श्रेयसः	''	''	*पं०*	अनडुहः	''	''
''	श्रेयसोः	श्रेयसाम्	*ष०*	''	अनडुहोः	अनडुहाम्
श्रेयसि	''	श्रेयस्सु	*स०*	अनडुहि	''	अनडुत्सु
हे श्रेयन्	हे श्रेयांसौ	हे श्रेयांसः	*सं०*	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः

❖ ❖ ❖

(ग) स्त्रीलिंग शब्द

(४१) रमा (लक्ष्मी) (दे० अ० ३) **(४२) मति (बुद्धि)** (दे० अ० ३९)

रमा				मति		
रमा	रमे	रमाः	*प्र०*	मतिः	मती	मतयः
रमाम्	''	''	*द्वि०*	मतिम्	''	मतीः
रमया	रमाभ्याम्	रमाभिः	*तृ०*	मत्या	मतिभ्याम्	मतिभिः
रमायै	''	रमाभ्यः	*च०*	मत्यै, मतये	''	मतिभ्यः
रमायाः	''	''	*पं०*	मत्याः, मतेः	''	''
''	रमयोः	रमाणाम्	*ष०*	'' ''	मत्योः	मतीनाम्
रमायाम्	''	रमासु	*स०*	मत्याम्, मतौ	''	मतिषु
हे रमे	हे रमे	हे रमाः	*सं०*	हे मते	हे मती	हे मतयः

(४३) नदी (नदी) (दे० अ० ४०) | **(४४) लक्ष्मी (लक्ष्मी)** (दे० अ० ४०)

नदी	नद्यौ	नद्य:	प्र०	लक्ष्मी:	लक्ष्म्यौ	लक्ष्म्य:
नदीम्	''	नदी:	द्वि०	लक्ष्मीम्	''	लक्ष्मी:
नद्या	नदीभ्याम्	नदीभि:	तृ०	लक्ष्म्या	लक्ष्मीभ्याम्	लक्ष्मीभि:
नद्यै	''	नदीभ्य:	च०	लक्ष्म्यै	''	लक्ष्मीभ्य:
नद्या:	''	''	पं०	लक्ष्म्या:	''	''
''	नद्यो:	नदीनाम्	ष०	''	लक्ष्म्यो:	लक्ष्मीणाम्
नद्याम्	''	नदीषु	स०	लक्ष्म्याम्	''	लक्ष्मीषु
हे नदि	हे नद्यौ	हे नद्य:	सं०	हे लक्ष्मि	हे लक्ष्म्यौ	हे लक्ष्म्य:

❖ ❖ ❖

(४५) स्त्री (स्त्री) (दे० अ० ४१) | **(४६) श्री (लक्ष्मी)** (दे० अ० ४१)

स्त्री	स्त्रियौ	स्त्रिय:	प्र०	श्री:	श्रियौ	श्रिय:
स्त्रियम्, स्त्रीम्	''	स्त्रिय:, स्त्री:	द्वि०	श्रियम्	''	''
स्त्रिया	स्त्रीभ्याम्	स्त्रीभि:	तृ०	श्रिया	श्रीभ्याम्	श्रीभि:
स्त्रियै	''	स्त्रीभ्य:	च०	श्रियै, श्रिये	''	श्रीभ्य:
स्त्रिया:	''	''	पं०	श्रिया:, श्रिय:	''	''
''	स्त्रियो:	स्त्रीणाम्	ष०	'' ''	श्रियो:	श्रियाम्
स्त्रियाम्	''	स्त्रीषु	स०	श्रियाम्, श्रियि	''	श्रीषु
हे स्त्रि	हे स्त्रियौ	हे स्त्रिय:	सं०	हे श्री:	हे श्रियौ	हे श्रिय:

❖ ❖ ❖

(४७) धेनु (गाय) (दे० अ० ४२) | **(४८) वधू (बहू)** (दे० अ० ४२)

धेनु:	धेनू	धेनव:	प्र०	वधू:	वध्वौ	वध्व:
धेनुम्	''	धेनू:	द्वि०	वधूम्	''	वधू:
धेन्वा	धेनुभ्याम्	धेनुभि:	तृ०	वध्वा	वधूभ्याम्	वधूभि:
धेन्वै, धेनवे	''	धेनुभ्य:	च०	वध्वै	''	वधूभ्य:
धेन्वा:, धेनो:	''	''	पं०	वध्वा:	''	''
'' ''	धेन्वो:	धेनूनाम्	ष०	''	वध्वो:	वधूनाम्
धेन्वाम्, धेनौ	''	धेनुषु	स०	वध्वाम्	''	वधूषु
हे धेनो	हे धेनू	हे धेनव:	सं०	हे वधु	हे वध्वौ	हे वध्व:

(४९) स्वसृ (बहन) (दे० अ० ४३)				**(५०) मातृ (माता)** (दे० अ० ४३)		
स्वसा	स्वसारौ	स्वसारः	प्र०	माता	मातरौ	मातरः
स्वसारम्	,,	स्वसॄः	द्वि०	मातरम्	,,	मातॄः
स्वस्रा	स्वसृभ्याम्	स्वसृभिः	तृ०	मात्रा	मातृभ्याम्	मातृभिः
स्वस्रे	,,	स्वसृभ्यः	च०	मात्रे	,,	मातृभ्यः
स्वसुः	,,	,,	पं०	मातुः	,,	,,
,,	स्वस्रोः	स्वसॄणाम्	ष०	,,	मात्रोः	मातॄणाम्
स्वसरि	,,	स्वसृषु	स०	मातरि	,,	मातृषु
हे स्वसः	हे स्वसारौ	हे स्वसारः	सं०	हे मातः	हे मातरौ	हे मातरः

❖ ❖ ❖

(५१) नौ (नाव) (दे० अ० ४४)				**(५२) वाच् (वाणी)** (दे० अ० ४४)		
नौः	नावौ	नावः	प्र०	वाक्,-ग्	वाचौ	वाचः
नावम्	,,	,,	द्वि०	वाचम्	,,	,,
नावा	नौभ्याम्	नौभिः	तृ०	वाचा	वाग्भ्याम्	वाग्भिः
नावे	,,	नौभ्यः	च०	वाचे	,,	वाग्भ्यः
नावः	,,	,,	पं०	वाचः	,,	,,
,,	नावोः	नावाम्	ष०	,,	वाचोः	वाचाम्
नावि	,,	नौषु	स०	वाचि	,,	वाक्षु
हे नौः	हे नावौ	हे नावः	सं०	हे वाक्,-ग्	हे वाचौ	हे वाचः

❖ ❖ ❖

(५३) स्रज् (माला) (दे० अ० ४५)				**(५४) सरित् (नदी)** (दे० अ० ४५)		
स्रक्	स्रजौ	स्रजः	प्र०	सरित्	सरितौ	सरितः
स्रजम्	,,	,,	द्वि०	सरितम्	,,	,,
स्रजा	स्रग्भ्याम्	स्रग्भिः	तृ०	सरिता	सरिद्भ्याम्	सरिद्भिः
स्रजे	,,	स्रग्भ्यः	च०	सरिते	,,	सरिद्भ्यः
स्रजः	,,	,,	पं०	सरितः	,,	,,
,,	स्रजोः	स्रजाम्	ष०	,,	सरितोः	सरिताम्
स्रजि	,,	स्रक्षु	स०	सरिति	,,	सरित्सु
हे स्रक्	हे स्रजौ	हे स्रजः	सं०	हे सरित्	हे सरितौ	हे सरितः

(५५) समिध् (समिधा) (दे० अ० ४६) **(५६) अप् (जल)** (दे० अ० ४६)

समित्	समिधौ	समिधः	*प्र०*	आपः
समिधम्	''	''	*द्वि०*	अपः
समिधा	समिद्भ्याम्	समिद्भिः	*तृ०*	अद्भिः
समिधे	''	समिद्भ्यः	*च०*	अद्भ्यः
समिधः	''	''	*पं०*	''
''	समिधोः	समिधाम्	*ष०*	अपाम्
समिधि	''	समित्सु	*स०*	अप्सु
हे समित्	हे समिधौ	हे समिधः	*सं०*	हे आपः

सूचना—अप् के रूप केवल बहुवचन में ही चलते हैं।

❖ ❖ ❖

(५७) गिर् (वाणी) (दे० अ० ४७) **(५८) पुर् (नगर)** (दे० अ० ४७)

गीः	गिरौ	गिरः	*प्र०*	पूः	पुरौ	पुरः
गिरम्	''	''	*द्वि०*	पुरम्	''	''
गिरा	गीर्भ्याम्	गीर्भिः	*तृ०*	पुरा	पूर्भ्याम्	पूर्भिः
गिरे	''	गीर्भ्यः	*च०*	पुरे	''	पूर्भ्यः
गिरः	''	''	*पं०*	पुरः	''	''
''	गिरोः	गिराम्	*ष०*	''	पुरोः	पुराम्
गिरि	''	गीर्षु	*स०*	पुरि	''	पूर्षु
हे गीः	हे गिरौ	हे गिरः	*सं०*	हे पूः	हे पुरौ	हे पुरः

❖ ❖ ❖

(५९) दिश् (दिशा) (दे० अ० ४८) **(६०) उपानह् (जूता)** (दे० अ० ४८)

दिक्	दिशौ	दिशः	*प्र०*	उपानत्	उपानहौ	उपानहः
दिशम्	''	''	*द्वि०*	उपानहम्	''	''
दिशा	दिग्भ्याम्	दिग्भिः	*तृ०*	उपानहा	उपानद्भ्याम्	उपानद्भिः
दिशे	''	दिग्भ्यः	*च०*	उपानहे	''	उपानद्भ्यः
दिशः	''	''	*पं०*	उपानहः	''	''
''	दिशोः	दिशाम्	*ष०*	''	उपानहोः	उपानहाम्
दिशि	''	दिक्षु	*स०*	उपानहि	''	उपानत्सु
हे दिक्	हे दिशौ	हे दिशः	*सं०*	हे उपानत्	हे उपानहौ	हे उपानहः

(घ) नपुंसकलिंग शब्द

(६१) गृह (घर) (दे० अ० २) **(६२) वारि (जल)** (दे० अ० ४९)

गृहम्	गृहे	गृहाणि	प्र०	वारि	वारिणी	वारीणि
''	''	''	द्वि०	''	''	''
गृहेण	गृहाभ्याम्	गृहैः	तृ०	वारिणा	वारिभ्याम्	वारिभिः
गृहाय	''	गृहेभ्यः	च०	वारिणे	''	वारिभ्यः
गृहात्	''	''	पं०	वारिणः	''	''
गृहस्य	गृहयोः	गृहाणाम्	ष०	''	वारिणोः	वारीणाम्
गृहे	''	गृहेषु	स०	वारिणि	''	वारिषु
हे गृह	हे गृहे	हे गृहाणि	सं०	हे वारि, वारे	हे वारिणी	हे वारीणि

सूचना— मनोहारिन् आदि इन् अन्तवालों के रूप वारि के तुल्य चलेंगे। दो स्थानों पर अन्तर होगा। षष्ठी बहु० में 'इनाम्' अन्त में रहेगा और सं० एक० में 'इन्'।

❖ ❖ ❖

(६३) दधि (दही) (दे० अ० ४९) **(६४) अक्षि (आँख)** (दधिवत्) (दे० अ० ५०)

दधि	दधिनी	दधीनि	प्र०	अक्षि	अक्षिणी	अक्षीणि
''	''	''	द्वि०	''	''	''
दध्ना	दधिभ्याम्	दधिभिः	तृ०	अक्ष्णा	अक्षिभ्याम्	अक्षिभिः
दध्ने	''	दधिभ्यः	च०	अक्ष्णे	''	अक्षिभ्य·
दध्नः	''	''	पं०	अक्ष्णः	''	''
''	दध्नोः	दध्नाम्	ष०	''	अक्ष्णोः	अक्ष्णाम्
दध्नि, दधनि	''	दधिषु	स०	अक्ष्णि, अक्षणि	''	अक्षिषु
हे दधि, दधे	हे दधिनी	हे दधीनि	सं०	हे अक्षि, अक्षे	हे अक्षिणी	हे अक्षीणि

❖ ❖ ❖

(६५) अस्थि (हड्डी) (दधिवत्) (दे० अ० ५०) **(६६) मधु (शहद)** (दे० अ० ५१)

अस्थि	अस्थिनी	अस्थीनि	प्र०	मधु	मधुनी	मधूनि
''	''	''	द्वि०	''	''	''
अस्थ्ना	अस्थिभ्याम्	अस्थिभिः	तृ०	मधुना	मधुभ्याम्	मधुभिः
अस्थ्ने	''	अस्थिभ्यः	च०	मधुने	''	मधुभ्यः
अस्थ्नः	''	''	पं०	मधुनः	''	''
''	अस्थ्नोः	अस्थ्नाम्	ष०	''	मधुनोः	मधूनाम्
अस्थ्नि, अस्थनि	''	अस्थिषु	स०	मधुनि	''	मधुषु
हे अस्थि, अस्थे	हे अस्थिनी	हे अस्थीनि	सं०	हे मधु, मधो	हे मधुनी	हे मधूनि

(६७) कर्तृ (करनेवाला) (दे० अ० ५१) **(६८) जगत् (संसार)** (दे० अ० ५२)

कर्तृ	कर्तृणी	कर्तृणि	प्र०	जगत्	जगती	जगन्ति
''	''	''	द्वि	''	''	''
कर्तृणा	कर्तृभ्याम्	कर्तृभिः	तृ०	जगता	जगद्भ्याम्	जगद्भिः
कर्तृणे	''	कर्तृभ्यः	च०	जगते	''	जगद्भ्यः
कर्तृणः	''	''	पं०	जगतः	''	''
''	कर्तृणोः	कर्तृणाम्	ष०	''	जगतोः	जगताम्
कर्तृणि	''	कर्तृषु	स०	जगति	''	जगत्सु
हे कर्तृ, कर्तः	हे कर्तृणी	हे कर्तृणि	सं०	हे जगत्	हे जगती	हे जगन्ति

सूचना—कर्तृ के तृतीया एक० से सप्तमी बहु० तक कर्तृ पुं० (शब्द० ११) के तुल्य भी रूप चलेंगे।

❖ ❖ ❖

(६९) नामन् (नाम) (दे० अ० ५३) **(७०) शर्मन् (सुख)** (दे० अ० ५३)

नाम	नाम्नी, नामनी	नामानि	प्र०	शर्म	शर्मणी	शर्माणि
''	'' ''	''	द्वि०	''	''	''
नाम्ना	नामभ्याम्	नामभिः	तृ०	शर्मणा	शर्मभ्याम्	शर्मभिः
नाम्ने	''	नामभ्यः	च०	शर्मणे	''	शर्मभ्यः
नाम्नः	''	''	पं०	शर्मणः	''	''
''	नाम्नोः	नाम्नाम्	ष०	''	शर्मणोः	शर्मणाम्
नाम्नि, नामनि	''	नामसु	स०	शर्मणि	''	शर्मसु
हे नाम, नामन्	नाम्नी, नामनी	नामानि	सं०	हे शर्म, शर्मन्	हे शर्मणी	हे शर्माणि

❖ ❖ ❖

(७१) ब्रह्मन् (ब्रह्म, वेद) (दे० अ० ५४) **(७२) अहन् (दिन)** (दे० अ० ५४)

ब्रह्म	ब्रह्मणी	ब्रह्माणि	प्र०	अहः	अह्नी, अहनी	अहानि
''	''	''	द्वि०	''	'' ''	''
ब्रह्मणा	ब्रह्मभ्याम्	ब्रह्मभिः	तृ०	अह्ना	अहोभ्याम्	अहोभिः
ब्रह्मणे	''	ब्रह्मभ्यः	च०	अह्ने	''	अहोभ्यः
ब्रह्मणः	''	''	पं०	अह्नः	''	''
''	ब्रह्मणोः	ब्रह्मणाम्	ष०	''	अह्नोः	अह्नाम्
ब्रह्मणि	''	ब्रह्मसु	स०	अह्नि, अहनि	''	अहःसु, -स्सु
हे ब्रह्म, ब्रह्मन्	हे ब्रह्मणी	हे ब्रह्माणि	सं०	हे अहः	हे अह्नी, अहनी	हे अहानि

(७३) हविष् (हवि) ((दे० अ० ५५) **(७४) धनुष् (धनुष)** (दे० अ० ५५)

हवि:	हविषी	हवींषि	प्र०	धनु:	धनुषी	धनूंषि
''	''	''	द्वि०	''	''	''
हविषा	हविर्भ्याम्	हविर्भि:	तृ०	धनुषा	धनुर्भ्याम्	धनुर्भि:
हविषे	''	हविर्भ्य:	च०	धनुषे	''	धनुर्भ्य:
हविष:	''	''	पं०	धनुष:	''	''
''	हविषो:	हविषाम्	ष०	''	धनुषो:	धनुषाम्
हविषि	''	हवि:षु,-ष्षु	स०	धनुषि	''	धनु:षु, -ष्षु
हे हवि:	हे हविषी	हवींषि	सं०	हे धनु:	हे धनुषी	हे धनूंषि

❖ ❖ ❖

(७५) पयस् (दूध, जल) (दे० अ० ५६) **(७६) मनस् (मन)** (दे० अ० ५६)

पय:	पयसी	पयांसि	प्र०	मन:	मनसी	मनांसि
''	''	''	द्वि०	''	''	''
पयसा	पयोभ्याम्	पयोभि:	तृ०	मनसा	मनोभ्याम्	मनोभि:
पयसे	''	पयोभ्य:	च०	मनसे	''	मनोभ्य:
पयस:	''	''	पं०	मनस:	''	''
''	पयसो:	पयसाम्	ष०	''	मनसो:	मनसाम्
पयसि	''	पय:सु,-स्सु	स०	मनसि	''	मन:सु, -स्सु
हे पय:	हे पयसी	हे पयांसि	सं०	हे मन:	हे मनसी	हे मनांसि

❖ ❖ ❖

(ङ) सर्वनाम शब्द

(७७) (क) सर्व (सब) पुंलिंग (दे० अ० ६) **(७७) (ग) सर्व (सब) (स्त्रीलिंग)** (दे० अ० ८)

सर्व:	सर्वौ	सर्वे	प्र०	सर्वा	सर्वे	सर्वा:
सर्वम्	''	सर्वान्	द्वि०	सर्वाम्	''	''
सर्वेण	सर्वाभ्याम्	सर्वै:	तृ०	सर्वया	सर्वाभ्याम्	सर्वाभि:
सर्वस्मै	''	सर्वेभ्य:	च०	सर्वस्यै	''	सर्वाभ्य:
सर्वस्मात्	''	''	पं०	सर्वस्या:	''	''
सर्वस्य	सर्वयो:	सर्वेषाम्	ष०	''	सर्वयो:	सर्वासाम्
सर्वस्मिन्	''	सर्वेषु	स०	सर्वस्याम्	''	सर्वासु

❖ ❖ ❖

(७७) (ख) सर्व (नपुंसकलिंग) (दे० अ० ७)

सर्वम्	सर्वे	सर्वाणि	प्र०
''	''	''	द्वि०

शेष पुंलिंग के तुल्य (दे० ७७, क)

(७८) (क) विश्व (सब) पुंलिंग (दे० अ० ६)   **(७९) (क) पूर्व (पहला) पुंलिंग** (दे० अ० ६)

विश्वः	विश्वौ	विश्वे	प्र०	पूर्वः	पूर्वौ	पूर्वे, पूर्वाः
विश्वम्	,,	विश्वान्	द्वि०	पूर्वम्	,,	पूर्वान्
विश्वेन	विश्वाभ्याम्	विश्वैः	तृ०	पूर्वेण	पूर्वाभ्याम्	पूर्वैः
विश्वस्मै	,,	विश्वेभ्यः	च०	पूर्वस्मै	,,	पूर्वेभ्यः
विश्वस्मात्	,,	,,	पं०	पूर्वस्मात्, पूर्वात्	,,	,,
विश्वस्य	विश्वयोः	विश्वेषाम्	ष०	पूर्वस्य	पूर्वयोः	पूर्वेषाम्
विश्वस्मिन्	,,	विश्वेषु	स०	पूर्वस्मिन्, पूर्वे	,,	पूर्वेषु

❖ ❖ ❖

(७८) (ख) विश्व (नपुंसकलिंग) (दे० अ० ७)   **(७९) (ख) पूर्व (नपुंसकलिंग)** (दे० अ० ७)

विश्वम्	विश्वे	विश्वानि	प्र०	पूर्वम्	पूर्वे	पूर्वाणि
,,	,,	,,	द्वि०	,,	,,	,,

शेष पुंलिंग के तुल्य (दे० अ० ७८, क)   शेष पुंलिंग के तुल्य (देखो ७९, क)

❖ ❖ ❖

(७८) (ग) विश्व (स्त्रीलिंग) (दे० अ० ८)   **(७९) (ग) पूर्व (स्त्रीलिंग)** (दे० अ० ८)

विश्वा	विश्वे	विश्वाः	प्र०	पूर्वा	पूर्वे	पूर्वाः
विश्वाम्	,,	,,	द्वि०	पूर्वाम्	,,	,,
विश्वया	विश्वाभ्याम्	विश्वाभिः	तृ०	पूर्वया	पूर्वाभ्याम्	पूर्वाभिः
विश्वस्यै	,,	विश्वाभ्यः	च०	पूर्वस्यै	,,	पूर्वाभ्यः
विश्वस्याः	,,	,,	पं०	पूर्वस्याः	,,	,,
,,	विश्वयोः	विश्वासाम्	ष०	,,	पूर्वयोः	पूर्वासाम्
विश्वस्याम्	,,	विश्वासु	स०	पूर्वस्याम्	,,	पूर्वासु

❖ ❖ ❖

(८०) (क) अन्य (दूसरा) पुंलिंग (दे० अ० ६)   **(८०) (ग) अन्य (स्त्रीलिंग)** (दे० अ० ८)

अन्यः	अन्यौ	अन्ये	प्र०	अन्या	अन्ये	अन्याः
अन्यम्	,,	अन्यान्	द्वि०	अन्याम्	,,	,,
अन्येन	अन्याभ्याम्	अन्यैः	तृ०	अन्यया	अन्याभ्याम्	अन्याभिः
अन्यस्मै	,,	अन्येभ्यः	च०	अन्यस्यै	,,	अन्याभ्यः
अन्यस्मात्	,,	,,	पं०	अन्यस्याः	,,	,,
अन्यस्य	अन्ययोः	अन्येषाम्	ष०	,,	अन्दयोः	अन्यासाम्
अन्यस्मिन्	,,	अन्येषु	स०	अन्यस्याम्	,,	अन्यासु

❖ ❖ ❖

(८०) (ख) अन्य (नपुंसकलिंग) (दे० अ० ७)

अन्यत्	अन्ये	अन्यानि	प्र०
,,	,,	,,	द्वि०

शेष पुंलिंग के तुल्य (देखो ८०, क)

(८१) (क) तत् (वह) पुंलिंग (दे० अ० ६) — **(८२) (क) यत् (जो) पुंलिंग** (दे० अ० ६)

सः	तौ	ते	प्र०	यः	यौ	ये
तम्	''	तान्	द्वि०	यम्	''	यान्
तेन	ताभ्याम्	तैः	तृ०	येन	याभ्याम्	यैः
तस्मै	''	तेभ्यः	च०	यस्मै	''	येभ्यः
तस्मात्	''	''	पं०	यस्मात्	''	''
तस्य	तयोः	तेषाम्	ष०	यस्य	ययोः	येषाम्
तस्मिन्	''	तेषु	स०	यस्मिन्	''	येषु

(८१) (ख) तत् (नपुंसकलिंग) (दे० अ० ७) **(८२) (ख) यत् (नपुंसकलिंग)** (दे० अ० ७)

तत्	ते	तानि	प्र०	यत्	ये	यानि
''	''	''	द्वि०	''	''	''

शेष पुंलिंग के तुल्य (देखो ८१, क)   शेष पुंलिंग के तुल्य (देखो ८२, क)

(८१) (ग) तत् (स्त्रीलिंग) (दे० अ० ८) **(८२) (ग) यत् (स्त्रीलिंग)** (दे० अ० ८)

सा	ते	ताः	प्र०	या	ये	याः
ताम्	''	''	द्वि०	याम्	''	''
तया	ताभ्याम्	ताभिः	तृ०	यया	याभ्याम्	याभिः
तस्यै	''	ताभ्यः	च०	यस्यै	''	याभ्यः
तस्याः	''	''	पं०	यस्याः	''	''
''	तयोः	तासाम्	ष०	''	ययोः	यासाम्
तस्याम्	''	तासु	स०	यस्याम्	''	यासु

(८३) (क) एतत् (यह) पुंलिंग (तत् के तुल्य) — **(८४) (क) किम् (क्या) पुंलिंग** (तत् के तुल्य)

एषः	एतौ	एते	प्र०	कः	कौ	के
एतम्	''	एतान्	द्वि०	कम्	''	कान्

शेष तत् पुंलिंग (८१, क) के तुल्य।   शेष तत् पुंलिंग (८१, क) के तुल्य।

(८३) (ख) एतत् (नपुंसकलिंग) — **(८४) (ख) किम् (नपुंसक०)**

एतत्	एते	एतानि	प्र०	किम्	के	कानि
''	''	''	द्वि०	''	''	''

शेष तत् नपुं० (८१, ख) के तुल्य।   शेष तत् नपुं० (८१, ख) के तुल्य।

(८३) (ग) एतत् (स्त्रीलिंग) — **(८४) (ग) किम् (स्त्रीलिंग)**

एषा	एते	एताः	प्र०	का	के	काः
एताम्	''	''	द्वि०	काम्	''	''

शेष तत् स्त्रीलिंग (८१, ग) के तुल्य।   शेष तत् स्त्रीलिंग (८१, ग) के तुल्य।

(८५) युष्मद् (तू) (दे० अ० ११)

त्वम्	युवाम्	यूयम्	प्र०
त्वाम्	''	युष्मान्	द्वि०
त्वा	वाम्	वः	द्वि०
त्वया	युवाभ्याम्	युष्माभिः	तृ०
तुभ्यम्	''	युष्मभ्यम्	च०
ते	वाम्	वः	च०
त्वत्	युवाभ्याम्	युष्मत्	पं०
तव	युवयोः	युष्माकम्	ष०
ते	वाम्	वः	ष०
त्वयि	युवयोः	युष्मासु	स०

(८६) अस्मद् (मैं) (दे० अ० १२)

प्र०	अहम्	आवाम्	वयम्
द्वि०	माम्	''	अस्मान्
द्वि०	मा	नौ	नः
तृ०	मया	आवाभ्याम्	अस्माभिः
च०	मह्यम्	''	अस्मभ्यम्
च०	मे	नौ	नः
पं०	मत्	आवाभ्याम्	अस्मत्
ष०	मम	आवयोः	अस्माकम्
ष०	मे	नौ	नः
स०	मयि	आवयोः	अस्मासु

(८७) (क) इदम् (यह) पुंलिंग
(दे० अ० ९)

अयम्	इमौ	इमे	प्र०
इमम्	''	इमान्	द्वि०
अनेन	आभ्याम्	एभिः	तृ०
अस्मै	''	एभ्यः	च०
अस्मात्	''	''	पं०
अस्य	अनयोः	एषाम्	ष०
अस्मिन्	''	एषु	स०

(८८) (क) अदस् (वह) पुंलिंग
(दे० अ० १०)

प्र०	असौ	अमू	अमी
द्वि०	अमुम्	''	अमून्
तृ०	अमुना	अमूभ्याम्	अमीभिः
च०	अमुष्मै	''	अमीभ्यः
पं०	अमुष्मात्	''	''
ष०	अमुष्य	अमुयोः	अमीषाम्
स०	अमुष्मिन्	''	अमीषु

(८७) (ख) इदम् (नपुंसक०)

इदम्	इमे	इमानि	प्र०
''	''	''	द्वि०

शेष पुंलिंग के तुल्य (देखो ८७, क)

(८८) (ख) अदस् (नपुंसक०)

प्र०	अदः	अमू	अमूनि
द्वि०	''	''	''

शेष पुंलिंग के तुल्य (देखो ८८, क)

(८७) (ग) इदम् (स्त्रीलिंग)

इयम्	इमे	इमाः	प्र०
इमाम्	''	''	द्वि०
अनया	आभ्याम्	आभिः	तृ०
अस्यै	''	आभ्यः	च०
अस्याः	''	''	पं०
''	अनयोः	आसाम्	ष०
अस्याम्	''	आसु	स०

(८८) (ग) अदस् (स्त्रीलिंग)

प्र०	असौ	अमू	अमूः
द्वि०	अमूम्	''	''
तृ०	अमुया	अमूभ्याम्	अमूभिः
च०	अमुष्यै	''	अमूभ्यः
पं०	अमुष्याः	''	''
ष०	''	अमुयोः	अमूषाम्
स०	अमुष्याम्	''	अमूषु

(८९) एक (एक) (दे० अ० १३)

पुंलिंग	*नपुंसक*	*स्त्रीलिंग*	
एक:	एकम्	एका	*प्र०*
एकम्	,,	एकाम्	*द्वि०*
एकेन	एकेन	एकया	*तृ०*
एकस्मै	एकस्मै	एकस्यै	*च०*
एकस्मात्	एकस्मात्	एकस्या:	*पं०*
एकस्य	एकस्य	,,	*ष०*
एकस्मिन्	एकस्मिन्	एकस्याम्	*स०*

सूचना-एक के केवल एक० में रूप चलते हैं।

(९०) द्वि (दो) (दे० अ० १४)

	पुंलिंग	*नपुंसक*	*स्त्रीलिंग*
प्र०	द्वौ	द्वे	द्वे
द्वि०	,,	,,	,,
तृ०	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
च०	,,	,,	,,
पं०	,,	,,	,,
ष०	द्वयो:	द्वयो:	द्वयो:
स०	,,	,,	,,

सूचना-द्वि के द्वि० में ही रूप चलेंगे।

(९१) (त्रि) (तीन) (दे० अ० १५)

पुंलिंग	*नपुंसक*	*स्त्रीलिंग*	
त्रय:	त्रीणि	तिस्र:	*प्र०*
त्रीन्	,,	,,	*द्वि०*
त्रिभि:	त्रिभि:	तिसृभि:	*तृ०*
त्रिभ्य:	त्रिभ्य:	तिसृभ्य:	*च०*
,,	,,	,,	*पं०*
त्रयाणाम्	त्रयाणाम्	तिसृणाम्	*ष०*
त्रिषु	त्रिषु	तिसृषु	*स०*

सूचना-त्रि के बहु० में ही रूप चलते हैं।

(९२) चतुर् (चार) (दे० अ० १६)

	पुंलिंग	*नपुंसक*	*स्त्रीलिंग*
प्र०	चत्वार:	चत्वारि	चतस्र:
द्वि०	चतुर:	,,	,,
तृ०	चतुर्भि:	चतुर्भि:	चतसृभि:
च०	चतुर्भ्य:	चतुर्भ्य:	चतसृभ्य:
पं०	,,	,,	,,
ष०	चतुर्णाम्	चतुर्णाम्	चतसृणाम्
स०	चतुर्षु	चतुर्षु	चतसृषु

सूचना-चतुर् के बहु० में ही रूप चलते हैं।

(९३) पञ्चन् (पाँच)	**(९४) षष् (छ:)**		**(९५) सप्तन् (सात)**
पञ्च	षट्, षड्	*प्र०*	सप्त
,,	,,	*द्वि०*	,,
पञ्चभि:	षड्भि:	*तृ०*	सप्तभि:
पञ्चभ्य:	षड्भ्य:	*च०*	सप्तभ्य:
,,	,,	*पं०*	,,
पञ्चानाम्	षण्णाम्	*ष०*	सप्तानाम्
पञ्चसु	षट्सु	*स०*	सप्तसु

सूचना—३ से १८ तक की संख्याओं के रूप केवल बहुवचन में ही चलते हैं।

(९६) अष्टन् (आठ)			**(९७) नवन् (नौ)**	**(९८) दशन् (दश)**
अष्ट	अष्टौ	*प्र०*	नव	दश
''	''	*द्वि०*	''	''
अष्टभिः	अष्टाभिः	*तृ०*	नवभिः	दशभिः
अष्टभ्यः	अष्टाभ्यः	*च०*	नवभ्यः	दशभ्यः
''	''	*पं०*	''	''
अष्टानाम्	अष्टानाम्	*ष०*	नवानाम्	दशानाम्
अष्टसु	अष्टासु	*स०*	नवसु	दशसु

सूचना—अष्टन्, नवन्, दशन् के रूप बहुवचन में ही चलते हैं।

(९९) कति (कितने) (दे० अ० ५९)		**(१००) उभ (दोनों)** (दे० अ० ६०)	
		पुं०	नपुं०, स्त्री०
कति	*प्र०*	उभौ	उभे
''	*द्वि०*	''	''
कतिभिः	*तृ०*	उभाभ्याम्	उभाभ्याम्
कतिभ्यः	*च०*	''	''
''	*पं०*	''	''
कतीनाम्	*ष०*	उभयोः	उभयोः
कतिषु	*स०*	''	''

सूचना—कति के रूप बहु० में ही चलते हैं।

सूचना— उभ के रूप तीनों लिंगों में केवल द्विवचन में ही चलते हैं।

(२) संख्याएँ

१. एकः, एकम्, एका
२. द्वौ, द्वे, द्वे
३. त्रयः, त्रीणि, तिस्रः
४. चत्वारः, चत्वारि, चतस्रः
५. पञ्च
६. षट्
७. सप्त
८. अष्ट, अष्टौ
९. नव
१०. दश
११. एकादश
१२. द्वादश
१३. त्रयोदश
१४. चतुर्दश
१५. पञ्चदश
१६. षोडश
१७. सप्तदश
१८. अष्टादश
१९. नवदश
एकोनविंशतिः
२०. विंशतिः
२१. एकविंशतिः
२२. द्वाविंशतिः
२३. त्रयोविंशतिः
२४. चतुर्विंशतिः
२५. पञ्चविंशतिः
२६. षड्विंशतिः
२७. सप्तविंशतिः
२८. अष्टाविंशतिः
२९. नवविंशतिः
एकोनत्रिंशत्

३०. त्रिंशत्
३१. एकत्रिंशत्
३२. द्वात्रिंशत्
३३. त्रयस्त्रिंशत्
३४. चतुस्त्रिंशत्
३५. पञ्चत्रिंशत्
३६. षट्त्रिंशत्
३७. सप्तत्रिंशत्
३८. अष्टात्रिंशत्
३९. नवत्रिंशत्
एकोनचत्वारिंशत्
४०. चत्वारिंशत्
४१. एकचत्वारिंशत्
४२. द्विचत्वारिंशत्
द्वाचत्वारिंशत्
४३. त्रिचत्वारिंशत्
त्रयश्चत्वारिंशत्
४४. चतुश्चत्वारिंशत्
४५. पञ्चचत्वारिंशत्
४६. षट्चत्वारिंशत्
४७. सप्तचत्वारिंशत्
४८. अष्टचत्वारिंशत्
अष्टाचत्वारिंशत्
४९. नवचत्वारिंशत्
एकोनपञ्चाशत्
५०. पञ्चाशत्
५१. एकपञ्चाशत्
५२. द्विपञ्चाशत्
द्वापञ्चाशत्
५३. त्रिपञ्चाशत्
त्रयःपञ्चाशत्

५४. चतुःपञ्चाशत्
५५. पञ्चपञ्चाशत्
५६. षट्पञ्चाशत्
५७. सप्तपञ्चाशत्
५८. अष्टपञ्चाशत्
अष्टापञ्चाशत्
५९. नवपञ्चाशत्
एकोनषष्टिः
६०. षष्टिः
६१. एकषष्टिः
६२. द्विषष्टिः, द्वाषष्टिः
६३. त्रिषष्टिः
त्रयःषष्टिः
६४. चतुःषष्टिः
६५. पञ्चषष्टिः
६६. षट्षष्टिः
६७. सप्तषष्टिः
६८. अष्टषष्टिः
अष्टाषष्टिः
६९. नवषष्टिः
एकोनसप्ततिः
७०. सप्ततिः
७१. एकसप्ततिः
७२. द्विसप्ततिः
द्वासप्ततिः
७३. त्रिसप्ततिः
त्रयःसप्ततिः
७४. चतुःसप्ततिः
७५. पञ्चसप्ततिः
७६. षट्सप्ततिः
७७. सप्तसप्ततिः

७८. अष्टसप्तति:
अष्टासप्तति:
७९. नवसप्तति:
एकोनाशीति:
८०. अशीति:
८१. एकाशीति:
८२. द्व्यशीति:
८३. त्र्यशीति:
८४. चतुरशीति:
८५. पञ्चाशीति:
८६. षडशीति:
८७. सप्ताशीति:
८८. अष्टाशीति:
८९. नवाशीति:
एकोननवति:
९०. नवति:
९१. एकनवति:
९२. द्विनवति:
द्वानवति:
९३. त्रिनवति:
त्रयोनवति:
९४. चतुर्नवति:
९५. पञ्चनवति:
९६. षण्णवति:
९७. सप्तनवति:
९८. अष्टनवति:
अष्टानवति:
९९. नवनवति:
एकोनशतम्
१००. शतम्।

१ हजार – सहस्रम्। १० हजार – अयुतम्। १ लाख – लक्षम्। १० लाख – नियुतम्, प्रयुतम्। १ करोड़ – कोटि:। १० करोड़ – दशकोटि:। १ अरब – अर्बुदम्। १० अरब – दशार्बुदम्। १ खरब – खर्वम्। १० खरब – दशखर्वम्। १ नील – नीलम्। १० नील – दशनीलम्। १ पद्म – पद्मम्। १० पद्म – दशपद्मम्। १ शंख – शंखम्। १० शंख – दशशंखम्। १ महाशंख – महाशंखम्।

सूचना-१. (क) १०१ आदि संख्याओं के लिए अधिक शब्द लगाकर संख्याशब्द बनावें। जैसे-१०१ एकाधिकं शतम्। १०२ द्व्यधिकं शतम् आदि। (ख) २०० आदि के लिए दो आदि संख्यावाचक शब्द पहले रखकर बाद में 'शती' रखें, या शत पहले रखकर द्वयम्, त्रयम् आदि रखें। जैसे—२०० द्विशती, शतद्वयम्। ३०० त्रिशती, शतत्रयम्, ४०० चतु:शती, ५०० पञ्चशती, ६०० षट्शती, ७०० सप्तशती (हिन्दी सतसई), ८०० अष्टशती, ९०० नवशती आदि।

२. त्रि ३ से लेकर १८ (अष्टादशन्) तक सारे शब्दों के रूप केवल बहुवचन में चलते हैं। दशन् से अष्टादशन् तक दशन् के तुल्य।

३. एकोनविंशति से नवविंशति तक सारे शब्द एकवचनान्त स्त्रीलिंग हैं। इनके रूप एकवचन में ही चलते हैं। इकारान्त विंशति, सप्तति, अशीति, नवति तथा जिनके अन्त में ये हों, उनके रूप मति के तुल्य चलेंगे। तकारान्त त्रिंशत्, चत्वारिंशत्, पञ्चाशत् के रूप सरित् के तुल्य (शब्द सं० ५४) चलेंगे।

४. शतम्, सहस्रम्, अयुतम्, लक्षम्, नियुतम्, प्रयुतम् आदि शब्द सदा एकवचनान्त नपुंसक हैं। गृहवत् एकवचन में रूप चलेंगे। कोटि के मतिवत्। शत, सहस्र आदि शब्द काव्यों में अनन्त संख्या के अर्थ में भी प्रयुक्त होते हैं। **'शतं सहस्रमयुतं सर्वमानन्त्यवाचकम्'।**

५. संख्येय शब्द (प्रथम, द्वितीय आदि) बनाने के लिए अभ्यास १८ का व्याकरण देखें।

❖ ❖ ❖

(३) धातुरूप-संग्रह

आवश्यक निर्देश

१. संस्कृत में सारी धातुओं को १० विभागों में बाँटा गया है। उन्हें 'गण' कहते हैं, अतः १० गण हैं। धातु और तिङ् (ति, तः आदि) प्रत्यय के बीच में होनेवाले अ, उ, नु आदि को 'विकरण' कहते हैं। इनके अन्तर के आधार पर ही ये गण बनाए गए हैं। ये 'विकरण' लट्, लोट्, लङ् और विधिलिङ् में ही होते हैं, अन्य ६ लकारों में नहीं होते, यह स्मरण रखें। प्रत्येक गण में तीनों प्रकार की धातुएँ होती हैं, परस्मैपदी (ति, तः, अन्ति आदिवाली), आत्मनेपदी (ते, एते, अन्ते आदिवाली) और उभयपदी (पूर्वोक्त दोनों प्रकार के रूपवाली)। प्रत्येक गण की विशेषताएँ आगे प्रत्येक गण के विवरण में दी गई हैं। यहाँ अधिक प्रसिद्ध १०० धातुओं के रूप दिए गए हैं।

२. प्रत्येक गण के विवरण में उस गण में आनेवाली धातुओं के अन्त में क्या संक्षिप्त रूप लगेंगे, इसका विवरण दिया गया है। उस गण की धातुओं के अन्त में उन लकारों में निर्दिष्ट संक्षिप्त रूप लगावें।

३. गणों के अन्तर के कारण लृट्, लुट्, आशीर्लिङ्, लृङ्, लिट् और लुङ् में कोई अन्तर नहीं होता। अतः सभी गणों में इन लकारों में एक से ही रूप चलेंगे। इन लकारों के संक्षिप्त-रूप आगे दिए हैं, उन्हें स्मरण कर लें। सभी गणों में उन्हीं संक्षिप्त-रूपों को लगावें। अतएव धातु-रूपों में लृट्, लुट्, आशीर्लिङ् और लृङ् के प्रारम्भिक रूप ही संकेतमात्र दिए गए हैं। सभी धातुओं के लिट् और लुङ् के पूरे रूप दिए गए हैं।

४. दसों गणों के विकरण और मुख्य कार्य ये हैं—

	गण	विकरण	कार्य
(१)	भ्वादिगण	अ	लट् आदि में धातु को गुण होगा।
(२)	अदादिगण	×	लट् आदि के एक० में धातु को गुण होगा।
(३)	जुहोत्यादिगण	×	लट् आदि में धातु को द्वित्व और एक० में गुण।
(४)	दिवादिगण	य	लट् आदि में धातु को गुण नहीं होगा।
(५)	स्वादिगण	नु (नो)	लट् आदि में धातु को गुण नहीं होगा।
(६)	तुदादिगण	अ	,, ,, ,,
(७)	रुधादिगण	न (न्)	,, ,, ,,
(८)	तनादिगण	उ (ओ)	लट् आदि में धातु को पर० में गुण होगा।
(९)	क्र्यादिगण	ना (नी)	लट् आदि में धातु को गुण नहीं होगा।
(१०)	चुरादिगण	अय	लट् आदि में धातु को गुण या वृद्धि होगी।

(क) लकारों के संक्षिप्त रूप

परस्मैपद लट्				आत्मनेपद लट्		
ति	तः	अन्ति	प्र०	ते	इते (आते)	अन्ते (अते)
सि	थः	थ	म०	से	इथे (आथे)	ध्वे
मि	वः	मः	उ०	इ (ए)	वहे	महे

लोट्				लोट्		
तु	ताम्	अन्तु	प्र०	ताम्	इताम् (आताम्)	अन्ताम् (अताम्)
–, हि	तम्	त	म०	स्व	इथाम् (आथाम्)	ध्वम्
आनि	आव	आम	उ०	ऐ	आवहै	आमहै

लङ् (धातु से पहले अ या आ)				लङ् (धातु से पहले अ या आ)		
त्	ताम्	अन्	प्र०	त	इताम् (आताम्)	अन्त (अत)
:	तम्	त	म०	थाः	इथाम् (आथाम्)	ध्वम्
अम्	व	म	उ०	इ	वहि	महि

विधिलिङ्							विधिलिङ्		
ईत्	ईताम्	ईयुः	यात्	याताम्	युः	प्र०	ईत	ईयाताम्	ईरन्
ईः	ईतम्	ईत	याः	यातम्	यात	म०	ईथाः	ईयाथाम्	ईध्वम्
ईयम्	ईव	ईम	याम्	याव	याम	उ०	ईय	ईवहि	ईमहि

लृट्					लृट्			
(इ)	स्यति	स्यतः	स्यन्ति	प्र०	(इ)	स्यते	स्येते	स्यन्ते
	स्यसि	स्यथः	स्यथ	म०		स्यसे	स्येथे	स्यध्वे
	स्यामि	स्यावः	स्यामः	उ०		स्ये	स्यावहे	स्यामहे

लृट्					लृट्			
(इ)	ता	तारौ	तारः	प्र०	(इ)	ता	तारौ	तारः
	तासि	तास्थः	तास्थ	म०		तासे	तासाथे	ताध्वे
	तास्मि	तास्वः	तास्मः	उ०		ताहे	तास्वहे	तास्महे

आशीर्लिङ्					आशीर्लिङ्			
(×)	यात्	यास्ताम्	यासुः	प्र०	(इ)	सीष्ट	सीयास्ताम्	सीरन्
	याः	यास्तम्	यास्त	म०		सीष्ठाः	सीयास्थाम्	सीध्वम्
	यासम्	यास्व	यास्म	उ०		सीय	सीवहि	सीमहि

लृङ् (धातु से पहले अ लगेगा)					**लृङ् (धातु से पहले अ लगेगा)**			
(इ)	स्यत्	स्यताम्	स्यन्	प्र०	(इ)	स्यत	स्येताम्	स्यन्त
	स्यः	स्यतम्	स्यत	म०		स्यथाः	स्येथाम्	स्यध्वम्
	स्यम्	स्याव	स्याम	उ०		स्ये	स्यावहि	स्यामहि

सूचना—लृट्, लुट् आशीर्लिङ् और लृङ् में सेट् में सं० रूप से पहले इ भी लगेगा।

परस्मैपद-लिट् / **आत्मनेपद-लिट्**

अ	अतुः	उः	*प्र० पु०*	इ	आते	इरे
(इ) थ	अथुः	अ	*म० पु०*	(इ) से	आथे	(इ) ध्वे
अ	(इ) व	(इ)म	*उ० पु०*	ए	(इ)वहे	(इ)महे

लुङ् (१. स्-लोप वाला भेद) / लुङ् (१. स-लोप वाला भेद)

त्	ताम्	उः (अन्)	*प्र० पु०*
ः	तम्	त	*म० पु०*
अम्	व	म	*उ० पु०*

सूचना— यह भेद आत्मनेपद में नहीं होता। लुङ् के ७ भेद होते हैं। आगे रूपों में लुङ् के आगे संख्या से इसका निर्देश होगा।

(२. अ-वाला भेद)

अत्	अताम्	अन्	*प्र० पु०*	अत	एताम्	अन्त
अः	अतम्	अत	*म० पु०*	अथाः	एथाम्	अध्वम्
अम्	आव	आम	*उ० पु०*	ए	आवहि	आमहि

(३. द्वित्व-वाला भेद)

अत्	अताम्	अन्	*प्र० पु०*	अत	एताम्	अन्त
अः	अतम्	अत	*म० पु०*	अथाः	एथाम्	अध्वम्
अम्	आव	आम	*उ० पु०*	ए	आवहि	आमहि

(४. स्-वाला भेद)

सीत्	स्ताम्	सुः	*प्र० पु०*	स्त	साताम्	सत
सीः	स्तम्	स्त	*म० पु०*	स्थाः	साथाम्	ध्वम्
सम्	स्व	स्म	*उ० पु०*	सि	स्वहि	स्महि

(५. इष्-वाला भेद)

ईत्	इष्टाम्	इषुः	*प्र० पु०*	इष्ट	इषाताम्	इषत
ईः	इष्टम्	इष्ट	*म० पु०*	इष्ठाः	इषाथाम्	इध्वम्-ढ्वम्
इषम्	इष्व	इष्म	*उ० पु०*	इषि	इष्वहि	इष्महि

(६. सिष्-वाला भेद)

सीत्	सिष्टाम्	सिषुः	*प्र० पु०*
सीः	सिष्टम्	सिष्ट	*म० पु०*
सिषम्	सिष्व	सिष्म	*उ० पु०*

सूचना—आत्मनेपद में यह भेद नहीं होता।

(७. स-वाला भेद)

सत्	सताम्	सन्	*प्र० पु०*	सत	साताम्	सन्त
सः	सतम्	सत	*म० पु०*	सथाः	साथाम्	सध्वम्
सम्	साव	साम	*उ० पु०*	सि	सावहि	सामहि

(१) भ्वादिगण

(१) भ्वादिगण की प्रथम धातु भू है, अतः इसका नाम भ्वादिगण पड़ा। दसों गणों में यह गण सबसे मुख्य है। सबसे अधिक धातुएँ इसी गण में हैं। चुरादिगण तक धातुपाठ में वर्णित धातुओं की संख्या १९४४ है, तथा कण्ड्वादि को लेकर धातुसंख्या १९९३ है। इसमें से भ्वादिगण की धातुओं की संख्या १०१० है। अतः ज्ञात होता है कि सम्पूर्ण धातुपाठ की आधे से अधिक धातुएँ भ्वादिगण में हैं।

(२) भ्वादिगण की विशेषताएँ ये हैं—(क) (कर्तरि शप्) धातु और प्रत्यय के बीच में शप् (अ) विकरण लगता है। इसलिए धातु के अन्त में अति, अतः, अन्ति आदि लगेंगे। मूल प्रत्यय ति, तः आदि हैं। (ख) धातु के अन्तिम स्वर इ, ई, उ, ऊ, ऋ, ॠ को तथा उपधा (अन्तिम अक्षर से पूर्व) के इ, उ, ऋ को क्रमशः ए, ओ, अर् गुण हो जाता है। बाद में गुण के ए को अय् और ओ को अव् हो जाता है। जैसे—भू > भवति, जि > जयति, हृ > हरति, शुच् > शोचति, मुद् > मोदते।

(३) लट् आदि में धातु के अन्त में संक्षिप्तरूप निम्नलिखित लगेंगे। लृट्, लुट्, आशीर्लिङ् और लृङ् में पृष्ठ १४४ पर निर्दिष्ट संक्षिप्तरूप ही लगेंगे।

परस्मैपद लट्				आत्मनेपद लट्		
अति	अतः	अन्ति	प्र०	अते	एते	अन्ते
असि	अथः	अथ	म०	असे	एथे	अध्वे
आमि	आवः	आमः	उ०	ए	आवहे	आमहे

लोट्				लोट्		
अतु	अताम्	अन्तु	प्र०	अताम्	एताम्	अन्ताम्
अ	अतम्	अत	म०	अस्व	एथाम्	अध्वम्
आनि	आव	आम	उ०	ऐ	आवहै	आमहै

लङ् (धातु से पूर्व अ या आ)				लङ् (धातु से पूर्व अ या आ)		
अत्	अताम्	अन्	प्र०	अत	एताम्	अन्त
अः	अतम्	अत	म०	अथाः	एथाम्	अध्वम्
अम्	आव	आम	उ०	ए	आवहि	आमहि

विधिलिङ्				विधिलिङ्		
एत्	एताम्	एयुः	प्र०	एत	एयाताम्	एरन्
एः	एतम्	एत	म०	एथाः	एयाथाम्	एध्वम्
एयम्	एव	एम	उ०	एय	एवहि	एमहि

(१) भ्वादिगण (परस्मैपदी धातुएँ)

(१) भू (होना) लट् (वर्तमान) (दे० अ० १) **लोट् (आज्ञा अर्थ)**

भवति	भवतः	भवन्ति	प्र० पु०	भवतु	भवताम्	भवन्तु
भवसि	भवथः	भवथ	म० पु०	भव	भवतम्	भवत
भवामि	भवावः	भवामः	उ० पु०	भवानि	भवाव	भवाम

लङ् (भूतकाल, अनद्यतन) **विधिलिङ् (आज्ञा या चाहिए अर्थ)**

अभवत्	अभवताम्	अभवन्	प्र० पु०	भवेत्	भवेताम्	भवेयुः
अभवः	अभवतम्	अभवत	म० पु०	भवेः	भवेतम्	भवेत
अभवम्	अभवाव	अभवाम	उ० पु०	भवेयम्	भवेव	भवेम

लृट् (भविष्यत्) **लुट् (अनद्यतन भविष्यत्)**

भविष्यति	भविष्यतः	भविष्यन्ति	प्र० पु०	भविता	भवितारौ	भवितारः
भविष्यसि	भविष्यथः	भविष्यथ	म० पु०	भवितासि	भवितास्थः	भवितास्थ
भविष्यामि	भविष्यावः	भविष्यामः	उ० पु०	भवितास्मि	भवितास्वः	भवितास्मः

आशीर्लिङ् (आशीर्वाद) **लृङ् (हेतुहेतुमद् भविष्यत्)**

भूयात्	भूयास्ताम्	भूयासुः	प्र० पु०	अभविष्यत्	अभविष्यताम्	अभविष्यन्
भूयाः	भूयास्तम्	भूयास्त	म० पु०	अभविष्यः	अभविष्यतम्	अभविष्यत
भूयासम्	भूयास्व	भूयास्म	उ० पु०	अभविष्यम्	अभविष्याव	अभविष्याम

लिट् (परोक्ष भूत) **लुङ् (१) (सामान्य भूत)**

बभूव	बभूवतुः	बभूवुः	प्र० पु०	अभूत्	अभूताम्	अभूवन्
बभूविथ	बभूवथुः	बभूव	म० पु०	अभूः	अभूतम्	अभूत
बभूव	बभूविव	बभूविम	उ० पु०	अभूवम्	अभूव	अभूम

——

सूचना—(१) लङ् लुङ् और लृङ् में धातु से पहले 'अ' लगता है। यदि धातु का प्रथम अक्षर स्वर होगा तो धातु से पहले 'आ' लगेगा और सन्धिकार्य भी होगा।

(२) लुङ् के आगे दी हुई संख्याएँ इस बात का निर्देश करती हैं कि पृष्ठ १४५ पर दिए हुए लुङ् के ७ भेदों में कौन-सा भेद वहाँ पर है। जिस भेद का निर्देश हो, उसी भेद के संक्षिप्त-रूप पृष्ठ १४५ के अनुसार धातु के अन्त में लगावें। सम्पूर्ण धातुरूप के लिए यह निर्देश स्मरण रखें।

(२) हस् (हँसना) (भू के तुल्य) (दे० अ० १) | **(३) पठ् (पढ़ना)** (भू के तुल्य) (दे० अ० २)

लट्				**लट्**		
हसति	हसतः	हसन्ति	*प्र० पु०*	पठति	पठतः	पठन्ति
हससि	हसथः	हसथ	*म० पु०*	पठसि	पठथः	पठथ
हसामि	हसावः	हसामः	*उ० पु०*	पठामि	पठावः	पठामः
लोट्				**लोट्**		
हसतु	हसताम्	हसन्तु	*प्र० पु०*	पठतु	पठताम्	पठन्तु
हस	हसतम्	हसत	*म० पु०*	पठ	पठतम्	पठत
हसानि	हसाव	हसाम	*उ० पु०*	पठानि	पठाव	पठाम
लङ्				**लङ्**		
अहसत्	अहसताम्	अहसन्	*प्र० पु०*	अपठत्	अपठताम्	अपठन्
अहसः	अहसतम्	अहसत	*म० पु०*	अपठः	अपठतम्	अपठत
अहसम्	अहसाव	अहसाम	*उ० पु०*	अपठम्	अपठाव	अपठाम
विधिलिङ्				**विधिलिङ्**		
हसेत्	हसेताम्	हसेयुः	*प्र० पु०*	पठेत्	पठेताम्	पठेयुः
हसेः	हसेतम्	हसेत	*म० पु०*	पठेः	पठेतम्	पठेत
हसेयम्	हसेव	हसेम	*उ० पु०*	पठेयम्	पठेव	पठेम

हसिष्यति	हसिष्यतः	हसिष्यन्ति	*लृट्*	पठिष्यति	पठिष्यतः	पठिष्यन्ति
हसिता	हसितारौ	हसितारः	*लुट्*	पठिता	पठितारौ	पठितारः
हस्यात्	हस्यास्ताम्	हस्यासुः	*आ० लिङ्*	पठ्यात्	पठ्यास्ताम्	पठ्यासुः
अहसिष्यत्	अहसिष्यताम्	अहसिष्यन्	*लृङ्*	अपठिष्यत्	अपठिष्यताम्	अपठिष्यन्
लिट्				**लिट्**		
जहास	जहसतुः	जहसुः	*प्र० पु०*	पपाठ	पेठतुः	पेठुः
जहसिथ	जहसथुः	जहस	*म० पु०*	पेठिथ	पेठथुः	पेठ
जहास, जहस	जहसिव	जहसिम	*उ० पु०*	पपाठ, पपठ	पेठिव	पेठिम
लुङ् (५)				**लुङ् (५)**		
अहसीत्	अहसिष्टाम्	अहसिषुः	*प्र० पु०*	अपाठीत्	अपाठिष्टाम्	अपाठिषुः
अहसीः	अहसिष्टम्	अहसिष्ट	*म० पु०*	अपाठीः	अपाठिष्टम्	अपाठिष्ट
अहसिषम्	अहसिष्व	अहसिष्म	*उ० पु०*	अपाठिषम्	अपाठिष्व	अपाठिष्म

सूचना—पठ् के लुङ् में अपठीत् आदि भी रूप होते हैं। हस् (लुङ्) के तुल्य रूप चलेंगे।

(४) रक्ष् (रक्षा करना) (भू के तुल्य) (दे० अ० २)

लट्			
रक्षति	रक्षतः	रक्षन्ति	*प्र० पु०*
रक्षसि	रक्षथः	रक्षथ	*म० पु०*
रक्षामि	रक्षावः	रक्षामः	*उ० पु०*
लोट्			
रक्षतु	रक्षताम्	रक्षन्तु	*प्र० पु०*
रक्ष	रक्षतम्	रक्षत	*म० पु०*
रक्षाणि	रक्षाव	रक्षाम	*उ० पु०*
लङ्			
अरक्षत्	अरक्षताम्	अरक्षन्	*प्र० पु०*
अरक्षः	अरक्षतम्	अरक्षत	*म० पु०*
अरक्षम्	अरक्षाव	अरक्षाम	*उ० पु०*
विधिलिङ्			
रक्षेत्	रक्षेताम्	रक्षेयुः	*प्र० पु०*
रक्षेः	रक्षेतम्	रक्षेत	*म० पु०*
रक्षेयम्	रक्षेव	रक्षेम	*उ० पु०*
रक्षिष्यति	रक्षिष्यतः	रक्षिष्यन्ति	*लृट्*
रक्षिता	रक्षितारौ	रक्षितारः	*लुट्*
रक्ष्यात्	रक्ष्यास्ताम्	रक्ष्यासुः	*आ० लिङ्*
अरक्षिष्यत्	अरक्षिष्यताम्	अरक्षिष्यन्	*लृङ्*
लिट्			
ररक्ष	ररक्षतुः	ररक्षुः	*प्र० पु०*
ररक्षिथ	ररक्षथुः	ररक्ष	*म० पु०*
ररक्ष	ररक्षिव	ररक्षिम	*उ० पु०*
लुङ् (५)			
अरक्षीत्	अरक्षिष्टाम्	अरक्षिषुः	*प्र० पु०*
अरक्षीः	अरक्षिष्टम्	अरक्षिष्ट	*म० पु०*
अरक्षिषम्	अरक्षिष्व	अरक्षिष्म	*उ० पु०*

(५) वद् (बोलना) (भू के तुल्य) (दे० अ० ३)

लट्			
प्र० पु०	वदति	वदतः	वदन्ति
म० पु०	वदसि	वदथः	वदथ
उ० पु०	वदामि	वदावः	वदामः
लोट्			
प्र० पु०	वदतु	वदताम्	वदन्तु
म० पु०	वद	वदतम्	वदत
उ० पु०	वदानि	वदाव	वदाम
लङ्			
प्र० पु०	अवदत्	अवदताम्	अवदन्
म० पु०	अवदः	अवदतम्	अवदत
उ० पु०	अवदम्	अवदाव	अवदाम
विधिलिङ्			
प्र० पु०	वदेत्	वदेताम्	वदेयुः
म० पु०	वदेः	वदेतम्	वदेत
उ० पु०	वदेयम्	वदेव	वदेम
लृट्	वदिष्यति	वदिष्यतः	वदिष्यन्ति
लुट्	वदिता	वदितारौ	वदितारः
आ० लिङ्	उद्यात्	उद्यास्ताम्	उद्यासुः
लृङ्	अवदिष्यत्	अवदिष्यताम्	अवदिष्यन्
लिट्			
प्र० पु०	उवाद	ऊदतुः	ऊदुः
म० पु०	उवदिथ	ऊदथुः	ऊद
उ० पु०	उवाद, उवद	ऊदिव	ऊदिम
लुङ् (५)			
प्र० पु०	अवादीत्	अवादिष्टाम्	अवादिषुः
म० पु०	अवादीः	अवादिष्टम्	अवादिष्ट
उ० पु०	अवादिषम्	अवादिष्व	अवादिष्म

(६) गम् (जाना) (भू के तुल्य) (दे० अ० ३)

सूचना—लट् आदि में गम् को गच्छ् होगा।

(७) दृश् (देखना) (भू के तुल्य) (दे० अ० ४)

सूचना—लट् आदि में दृश् को पश्य् होगा।

लट्				लट्		
गच्छति	गच्छतः	गच्छन्ति	*प्र० पु०*	पश्यति	पश्यतः	पश्यन्ति
गच्छसि	गच्छथः	गच्छथ	*म० पु०*	पश्यसि	पश्यथः	पश्यथ
गच्छामि	गच्छावः	गच्छामः	*उ० पु०*	पश्यामि	पश्यावः	पश्यामः
लोट्				**लोट्**		
गच्छतु	गच्छताम्	गच्छन्तु	*प्र० पु०*	पश्यतु	पश्यताम्	पश्यन्तु
गच्छ	गच्छतम्	गच्छत	*म० पु०*	पश्य	पश्यतम्	पश्यत
गच्छानि	गच्छाव	गच्छाम	*उ० पु०*	पश्यानि	पश्याव	पश्याम
विधिलिङ्				**विधिलिङ्**		
गच्छेत्	गच्छेताम्	गच्छेयुः	*प्र० पु०*	पश्येत्	पश्येताम्	पश्येयुः
गच्छेः	गच्छेतम्	गच्छेत	*म० पु०*	पश्येः	पश्येतम्	पश्येत
गच्छेयम्	गच्छेव	गच्छेम	*उ० पु०*	पश्येयम्	पश्येव	पश्येम
—				—		
गमिष्यति	गमिष्यतः	गमिष्यन्ति	*लृट्*	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति
गन्ता	गन्तारौ	गन्तारः	*लुट्*	द्रष्टा	द्रष्टारौ	द्रष्टारः
गम्यात्	गम्यास्ताम्	गम्यासुः	*आ० लिङ्*	दृश्यात्	दृश्यास्ताम्	दृश्यासुः
अगमिष्यत्	अगमिष्यताम्	अगमिष्यन्	*लृङ्*	अद्रक्ष्यत्	अद्रक्ष्यताम्	अद्रक्ष्यन्
लिट्				**लिट्**		
जगाम	जग्मतुः	जग्मुः	*प्र० पु०*	ददर्श	ददृशतुः	ददृशुः
जग्मिथ, जगन्थ	जग्मथुः	जग्म	*म० पु०*	ददर्शिथ, दद्रष्ठ	ददृशथुः	ददृश
जगाम, जगम	जग्मिव	जग्मिम	*उ० पु०*	ददर्श	ददृशिव	ददृशिम
लुङ् (२)				**लुङ् (२), (४)**		
अगमत्	अगमताम्	अगमन्	*प्र० पु०*	(क) अदर्शत्	अदर्शताम्	अदर्शन्
अगमः	अगमतम्	अगमत	*म० पु०*	अदर्शः	अदर्शतम्	अदर्शत
अगमम्	अगमाव	अगमाम	*उ० पु०*	अदर्शम्	अदर्शाव	अदर्शाम
				(ख) अद्राक्षीत्	अद्राष्टाम्	अद्राक्षुः
				अद्राक्षीः	अद्राष्टम्	अद्राष्ट
				अद्राक्षम्	अद्राक्ष्व	अद्राक्ष्म

(८) पा (पीना) (भू के तुल्य)
(दे० अ० ५)

सूचना—लट् आदि में पा को पिब् होगा।

लट्

पिबति	पिबतः	पिबन्ति	*प्र० पु०*
पिबसि	पिबथः	पिबथ	*म० पु०*
पिबामि	पिबावः	पिबामः	*उ० पु०*

लोट्

पिबतु	पिबताम्	पिबन्तु	*प्र० पु०*
पिब	पिबतम्	पिबत	*म० पु०*
पिबानि	पिबाव	पिबाम	*उ० पु०*

लङ्

अपिबत्	अपिबताम्	अपिबन्	*प्र० पु०*
अपिबः	अपिबतम्	अपिबत	*म० पु०*
अपिबम्	अपिबाव	अपिबाम	*उ० पु०*

विधिलिङ्

पिबेत्	पिबेताम्	पिबेयुः	*प्र० पु०*
पिबेः	पिबेतम्	पिबेत	*म० पु०*
पिबेयम्	पिबेव	पिबेम	*उ० पु०*

पास्यति	पास्यतः	पास्यन्ति	*लृट्*
पाता	पातारौ	पातारः	*लुट्*
पेयात्	पेयास्ताम्	पेयासुः	*आ० लिङ्*
अपास्यत्	अपास्यताम्	अपास्यन्	*लृङ्*

लिट्

पपौ	पपतुः	पपुः	*प्र० पु०*
पपिथ, पपाथ	पपथुः	पप	*म० पु०*
पपौ	पपिव	पपिम	*उ० पु०*

लुङ् (१)

अपात्	अपाताम्	अपुः	*प्र० पु०*
अपाः	अपातम्	अपात	*म० पु०*
अपाम्	अपाव	अपाम	*उ० पु०*

(९) स्था (रुकना) (भू के तुल्य)
(दे० अ० ९)

सूचना—लट् आदि में स्था को तिष्ठ् होगा।

लट्

तिष्ठति	तिष्ठतः	तिष्ठन्ति
तिष्ठसि	तिष्ठथः	तिष्ठथ
तिष्ठामि	तिष्ठावः	तिष्ठामः

लोट्

तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
तिष्ठ	तिष्ठतम्	तिष्ठत
तिष्ठानि	तिष्ठाव	तिष्ठाम

लङ्

अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
अतिष्ठः	अतिष्ठतम्	अतिष्ठत
अतिष्ठम्	अतिष्ठाव	अतिष्ठाम

विधिलिङ्

तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः
तिष्ठेः	तिष्ठेतम्	तिष्ठेत
तिष्ठेयम्	तिष्ठेव	तिष्ठेम

स्थास्यति	स्थास्यतः	स्थास्यन्ति
स्थाता	स्थातारौ	स्थातारः
स्थेयात्	स्थेयास्ताम्	स्थेयासुः
अस्थास्यत्	अस्थास्यताम्	अस्थास्यन्

लिट्

तस्थौ	तस्थतुः	तस्थुः
तस्थिथ, तस्थाथ	तस्थथुः	तस्थ
तस्थौ	तस्थिव	तस्थिम

लुङ् (१)

अस्थात्	अस्थाताम्	अस्थुः
अस्थाः	अस्थातम्	अस्थात
अस्थाम्	अस्थाव	अस्थाम

(१०) घ्रा (सूँघना (भू के तुल्य)

(दे० अ० १३)

सूचना–लट् आदि में घ्रा को जिघ्र् होगा।

लट्

जिघ्रति	जिघ्रतः	जिघ्रन्ति	*प्र० पु०*
जिघ्रसि	जिघ्रथः	जिघ्रथ	*म० पु०*
जिघ्रामि	जिघ्रावः	जिघ्रामः	*उ० पु०*

लोट्

जिघ्रतु	जिघ्रताम्	जिघ्रन्तु	*प्र० पु०*
जिघ्र	जिघ्रतम्	जिघ्रत	*म० पु०*
जिघ्राणि	जिघ्राव	जिघ्राम	*उ० पु०*

लङ्

अजिघ्रत्	अजिघ्रताम्	अजिघ्रन्	*प्र० पु०*
अजिघ्रः	अजिघ्रतम्	अजिघ्रत	*म० पु०*
अजिघ्रम्	अजिघ्राव	अजिघ्राम	*उ० पु०*

विधिलिङ्

जिघ्रेत्	जिघ्रेताम्	जिघ्रेयुः	*प्र० पु०*
जिघ्रेः	जिघ्रेतम्	जिघ्रेत	*म० पु०*
जिघ्रेयम्	जिघ्रेव	जिघ्रेम	*उ० पु०*

घ्रास्यति	घ्रास्यतः	घ्रास्यन्ति	*लृट्*
घ्राता	घ्रातारौ	घ्रातारः	*लुट्*
घ्रेयात्	घ्रेयास्ताम्	घ्रेयासुः	*आ० लिङ्*
घ्रायात्	घ्रायास्ताम्	घ्रायासुः	*आ० लिङ्*
अघ्रास्यत्	अघ्रास्यताम्	अघ्रास्यन्	*लृङ्*

लिट्

जघ्रौ	जघ्रतुः	जघ्रुः	*प्र० पु०*
जघ्रिथ, जघ्राथ	जघ्रथुः	जघ्र	*म० पु०*
जघ्रौ	जघ्रिव	जघ्रिम	*उ० पु०*

लुङ् (क) (१)

अघ्रात्	अघ्राताम्	अघ्रुः	*प्र० पु०*
अघ्राः	अघ्रातम्	अघ्रात	*म० पु०*
अघ्राम्	अघ्राव	अघ्राम	*उ० पु०*

लुङ् (ख) (६)

अघ्रासीत्	अघ्रासिष्टाम्	अघ्रासिषुः	*प्र०*
अघ्रासीः	अघ्रासिष्टम्	अघ्रासिष्ट	*म०*
अघ्रासिषम्	अघ्रासिष्व	अघ्रासिष्म	*उ०*

(११) सद् (बैठना) (भू के तुल्य)

(दे० अ० ५)

सूचना–लट् आदि में सद् को सीद् होगा।

लट्

प्र० पु०	सीदति	सीदतः	सीदन्ति
म० पु०	सीदसि	सीदथः	सीदथ
उ० पु०	सीदामि	सीदावः	सीदामः

लोट्

प्र० पु०	सीदतु	सीदताम्	सीदन्तु
म० पु०	सीद	सीदतम्	सीदत
उ० पु०	सीदानि	सीदाव	सीदाम

लङ्

प्र० पु०	असीदत्	असीदताम्	असीदन्
म० पु०	असीदः	असीदतम्	असीदत
उ० पु०	असीदम्	असीदाव	असीदाम

विधिलिङ्

प्र० पु०	सीदेत्	सीदेताम्	सीदेयुः
म० पु०	सीदेः	सीदेतम्	सीदेत
उ० पु०	सीदेयम्	सीदेव	सीदेम

लृट्	सत्स्यति	सत्स्यतः	सत्स्यन्ति
लुट्	सत्ता	सत्तारौ	सत्तारः
आ० लिङ्	सद्यात्	सद्यास्ताम्	सद्यासुः
लृङ्	असत्स्यत्	असत्स्यताम्	असत्स्यन्

लिट्

प्र० पु०	ससाद	सेदतुः	सेदुः
म० पु०	सेदिथ, ससत्थ	सेदथुः	सेद
उ० पु०	ससाद, ससद	सेदिव	सेदिम

लुङ्(२)

प्र० पु०	असदत्	असदताम्	असदन्
म० पु०	असदः	असदतम्	असदत
उ० पु०	असदम्	असदाव	असदाम

(१२) पच् (पकाना) (भू के तुल्य)
(दे० अ० ११)

लट्

पचति	पचतः	पचन्ति	*प्र० पु०*
पचसि	पचथः	पचथ	*म० पु०*
पचामि	पचावः	पचामः	*उ० पु०*

लोट्

पचतु	पचताम्	पचन्तु	*प्र० पु०*
पच	पचतम्	पचत	*म० पु०*
पचानि	पचाव	पचाम	*उ० पु०*

लङ्

अपचत्	अपचताम्	अपचन्	*प्र० पु०*
अपचः	अपचतम्	अपचत	*म० पु०*
अपचम्	अपचाव	अपचाम	*उ० पु०*

विधिलिङ्

पचेत्	पचेताम्	पचेयुः	*प्र० पु०*
पचेः	पचेतम्	पचेत	*म० पु०*
पचेयम्	पचेव	पचेम	*उ० पु०*

पक्ष्यति	पक्ष्यतः	पक्ष्यन्ति	*लृट्*
पक्ता	पक्तारौ	पक्तारः	*लुट्*
पच्यात्	पच्यास्ताम्	पच्यासुः	*आ० लिङ्*
अपक्ष्यत्	अपक्ष्यताम्	अपक्ष्यन्	*लृङ्*

लिट्

पपाच	पेचतुः	पेचुः	*प्र० पु०*
पेचिथ, पपक्थ	पेचथुः	पेच	*म० पु०*
पपाच, पपच	पेचिव	पेचिम	*उ० पु०*

लुङ् (४)

अपाक्षीत्	अपाक्ताम्	अपाक्षुः	*प्र० पु०*
अपाक्षीः	अपाक्तम्	अपाक्त	*म० पु०*
अपाक्षम्	अपाक्ष्व	अपाक्ष्म	*उ० पु०*

(१३) नम् (नमस्कार करना)
(दे० अ० ११)

लट्

नमति	नमतः	नमन्ति
नमसि	नमथः	नमथ
नमामि	नमावः	नमामः

लोट्

नमतु	नमताम्	नमन्तु
नम	नमतम्	नमत
नमानि	नमाव	नमाम

लङ्

अनमत्	अनमताम्	अनमन्
अनमः	अनमतम्	अनमत
अनमम्	अनमाव	अनमाम

विधिलिङ्

नमेत्	नमेताम्	नमेयुः
नमेः	नमेतम्	नमेत
नमेयम्	नमेव	नमेम

नंस्यति	नंस्यतः	नंस्यन्ति
नन्ता	नन्तारौ	नन्तारः
नम्यात्	नम्यास्ताम्	नम्यासुः
अनंस्यत्	अनंस्यताम्	अनंस्यन्

लिट्

ननाम	नेमतुः	नेमुः
नेमिथ, ननन्थ	नेमतुः	नेम
ननाम, ननम	नेमिव	नेमिम

लुङ् (६)

अनंसीत्	अनंसिष्टाम्	अनंसिषुः
अनंसीः	अनंसिष्टम्	अनंसिष्ट
अनंसिषम्	अनंसिष्व	अनंसिष्म

(१४) स्मृ (स्मरण करना) (दे० अ० १२) **(१५) जि (जीतना)** (दे० अ० १२)

लट् | **लट्**

स्मरति	स्मरतः	स्मरन्ति	*प्र० पु०*	जयति	जयतः	जयन्ति
स्मरसि	स्मरथः	स्मरथ	*म० पु०*	जयसि	जयथः	जयथ
स्मरामि	स्मरावः	स्मरामः	*उ० पु०*	जयामि	जयावः	जयामः

लोट् | **लोट्**

स्मरतु	स्मरताम्	स्मरन्तु	*प्र० पु०*	जयतु	जयताम्	जयन्तु
स्मर	स्मरतम्	स्मरत	*म० पु०*	जय	जयतम्	जयत
स्मराणि	स्मराव	स्मराम	*उ० पु०*	जयानि	जयाव	जयाम

लङ् | **लङ्**

अस्मरत्	अस्मरताम्	अस्मरन्	*प्र० पु०*	अजयत्	अजयताम्	अजयन्
अस्मरः	अस्मरतम्	अस्मरत	*म० पु०*	अजयः	अजयतम्	अजयत
अस्मरम्	अस्मराव	अस्मराम	*उ० पु०*	अजयम्	अजयाव	अजयाम

विधिलिङ् | **विधिलिङ्**

स्मरेत्	स्मरेताम्	स्मरेयुः	*प्र० पु०*	जयेत्	जयेताम्	जयेयुः
स्मरेः	स्मरेतम्	स्मरेत	*म० पु०*	जयेः	जयेतम्	जयेत
स्मरेयम्	स्मरेव	स्मरेम	*उ० पु०*	जयेयम्	जयेव	जयेम

स्मरिष्यति	स्मरिष्यतः	स्मरिष्यन्ति	*लृट्*	जेष्यति	जेष्यतः	जेष्यन्ति
स्मर्ता	स्मर्तारौ	स्मर्तारः	*लुट्*	जेता	जेतारौ	जेतारः
स्मर्यात्	स्मर्यास्ताम्	स्मर्यासुः	*आ० लिङ्*	जीयात्	जीयास्ताम्	जीयासुः
अस्मरिष्यत्	अस्मरिष्यताम्	अस्मरिष्यन्	*लृङ्*	अजेष्यत्	अजेष्यताम्	अजेष्यन्

लिट् | **लिट्**

सस्मार	सस्मरतुः	सस्मरुः	*प्र० पु०*	जिगाय	जिग्यतुः	जिग्युः
सस्मर्थ	सस्मरथुः	सस्मर	*म० पु०*	जिगयिथ जिगेथ	जिग्यथुः	जिग्य
सस्मार, सस्मर	सस्मरिव	सस्मरिम	*उ० पु०*	जिगाय, जिगय	जिग्यिव	जिग्यिम

लुङ् (४) | **लुङ् (४)**

अस्मार्षीत्	अस्मार्ष्टाम्	अस्मार्षुः	*प्र० पु०*	अजैषीत्	अजैष्टाम्	अजैषुः
अस्मार्षीः	अस्मार्ष्टम्	अस्मार्ष्ट	*म० पु०*	अजैषीः	अजैष्टम्	अजैष्ट
